5. विजानीयात्प्राणो] B7, edN,C7; विजानीयाप्राणो - C1
6. वायुर्जितो] edN; वायुजितो - C1, B7, C7
7. प्रोक्तो] B7, C1, edN; प्रोक्त - C7
8. विशारदैः] B7, edN,C7; विशारदै - C1
9. धार्यमाणं] B7, edN; धार्यमाण - C1; धार्यमानं – C7
10. समीरणम्] C1; समीरणं - B7, edN; शमीरणं - C7
11. श्वासं] C1; स्वासं - B7, C7; स्वयं – edN
12. प्रमुच्येत] C1; विमुच्येत - B7, C7; विमुच्येते – edN
13. अपानं] B7; अपान - C1; अपानो - edN,C7
14. हीयते] C1; जीर्यते– B7; जीयहते - edN; जीवते - C7
15. चास्य] C1, edN,C7; चात्रस्य - B7
16. दोषो नापि] - edN; दोषश्चापि C1, B7; दोषं वापि - C7
47. पुरीषाणां] C1, edN; पुरीषानां - B7, C7
18. न खिद्यते] C1, B7; कदाचन - edN; नाखद्यते - C7
19. भवत्येवं] C1, B7; भवत्येव - edN,C7
20. संशयः] C1, edN,C7; शंसयः - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अत्यभ्यासात्[1] प्रजायन्ते[2] कदाचिद्योगिनस्तथा[3]।
भगन्दरादयो रोगा[4] इत्यपानजयः स्मृतः।।4.26।।

पूर्ववत्कुम्भकेनैव रुद्ध्वा वायोर्गतागतिम्[5]।
हृदये धारयेदेवं[6] समानं जीयते क्रमात्।।4.27।।[7]

जितस्य लक्षणं[8] चास्य नित्यारोग्यशरीरता।[9]
बह्वन्नपानदोषश्च[10] दीप्ताग्नित्वान्नजायते।।4.28।।

अतिप्रसम्भदोषाश्च[11] पार्श्वशूलादयस्तथा[12]।
कदाचित्सम्भवत्येषः[13] समान[14]जय उच्यते।।4.29।।

पूर्ववद्धारितं वायुं तदा योगी शनैः शनैः।[15]
मनसा प्रेरयेदूर्ध्वं प्रयत्नेन पुनः पुनः।।4.30।।[16]

---

1. अत्यभ्यासात] B7, C1, edN; अत्याभ्यासात् - C7
2. प्रजायन्ते] C1, B7, C7; प्रणश्यन्ति – edN
3. स्तथा] C1; स्तदा - B7, edN,C7
4. रोगा] B7, edN,C7; रोग - C1
5. वायोर्गतागतिम्] C1; वायोर्गतागतिं – B7; वायोर्गतागतं - edN; वार्योर्गतागतिं - C7
6. धारयेदेवं] B7, C7; धारयेदेव - C1
7. lines from - 4.27 Cd to 4.33 ab are missing in edN
8. लक्षणं] B7, C1, edN; लक्षण - C7
9. Line missing – edN
10. बह्वन्नपानदोषश्च] C1, C7; वक्षन्ते?पानदोषश्च - B7; Line missing – edN
11. अतिप्रसम्भदोषाश्च] B7, C7; अतिप्रसम्भदोषश्च - C1; Line missing - edN
12. oशूलाo] B7, C1, edN; oसूलाo - C7
13. सम्भवत्येषः] emd; सम्भवत्येष - C1, C7; सम्भवत्येस – B7
14. समान] B7, C7; समानो C1
15. Line missing – edN
16. Line missing – edN

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ततो यथाक्रमं कृत्वोदान एवं[1] विजीयते[2]।
लक्षणं लघुदेहत्वं शीघ्रगामित्वमेव[3] च।।4.31।।

श्रोत्रनेत्रापघातादिर्जायन्ते[4] योगिनस्तदा।
अत्याभ्यासस्य दोषेण स उदानजयः स्मृतः।।4.32।।[5]

तुच्छदेहे प्रशान्तेन[6] रुद्धा[7] वायोर्गतागतिम्।
न पूरयेन्न रेचयेदेवं व्यानो विजीयते।।4.33।।

जितस्य लक्षणं चास्य शिथिलस्निग्धगात्रता[8]।
अनन्ताशी[9] निरुद्वेगी[10] सर्वक्लेशसहो भवेत्।।4.34।।

स्नायुत्वगुपघातादिः[11] कदाचिज्जायते तदा[12]।
अत्याभ्यासस्य संयोगादेष व्यानजयः स्मृतः।।4.35।।

तेषां मध्ये प्रधानस्य निर्दोषस्य[13] विशेषतः।
प्राणस्यैव जयाभ्यासं प्रशंसन्ति मनीषिणः[14]।।4.36।।

---

1. कृत्वोदान एवं] C1; कृत्वोदान . . (not readable) - B7; कृत्वोदानमेवं - C7
2. विजीयते]B7, C7; विधीयते - C1; Line missing – edN
3. शीघ्रगामित्वमेव] B7, C1; शीघ्रगामित्यमेव - C7; Line missing – edN
4. श्रोत्रनेत्रापघातादिर्जायन्ते] C1; श्रोत्रनेत्रापघातादि जायते - B7; Line missing - edN; श्रोत्रनेत्रोपघातादि जायते - C7
5. Line missing – edN
6. प्रशान्तेन] C1; प्रसान्तेन - B7, C7; Line missing – edN
7. रुद्धा] C7; रुद्धो C1; रुथो/धो? - B7; Line missing - edN
8. शिथिलस्निग्धगात्रता] C1, B7; शिथिलं स्निग्धगात्रता - edN,C7
9. अनन्ताशी] B7, C1, edN; अनन्तीशी - C7
10. निरुद्वेगी] C1, edN,C7; निरुद्वागी - B7
11. स्नायुत्वगुपघातादिः] C1; स्नायुत्वगुपघातादि - B7, edN; स्नायुन्धगुपघातादि - C7
12. तदा] C1, B7, C7; नहि – edN
13. निर्दोषस्य] C1, C7, edN; निर्दोस?ष्य - B7
14. मनीषिणः] C1, edN,C7; मणीषिणः - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यदा तु प्राणमेवैक[1] योगी सम्यग्विजेष्यति।
तदा सर्वे जिता एव[2] भवन्त्येतेऽपि वायवः[3]।।4.37।।

किन्तु कर्मविभागार्थं मरुतान्देहवर्त्तिनाम्।
जयः[4] पञ्चविधः प्रोक्तो[5] योगिभिस्तत्त्वदर्शिभिः[6]।।4.38।।

एवं वायुं[7] विनिर्जित्य पश्चात्कर्मसमारभेत्।
अजितैस्तु कृतं कर्म दोषः समुपजायते।।4.39।।

नाडीशोधनमेकैक[8] कार्यं नाडीद्वितीयकम्[9]।
तृतीयं[10] धारणावंशं[11] योजनं नाम नामतः।।4.40।।

उद्रेचनी चतुर्थन्तु प्रलयोत्क्रान्तिपञ्चमम्[12]।
एतानि पञ्च कर्माणि[13] कीर्त्तितानि मनीषिभिः।।4.41।।

जितेन शोधयेन्नाडी[14] प्राणेनैकेन वायुना।
अथवा मध्यभागन्तु समानेन विचक्षणः।।4.42।।

1. प्राणमेवैकं] B7, edN,C7; प्राणमैवेकं - C1
2. एव] B7, edN,C7; सव/सच? - C1
3. वायवः] B7, C1, edN; वायव - C7
4. जयः] C1, edN,C7; जय - B7
5. प्रोक्तो] B7, C1, edN; प्रोक्त - C7
6. दर्शिभिः] C1, edN; दर्शिभः - B7; दशिभिः - C7
7. वायुं] C1, edN,C7; वायु - B7
8. नाडीशोधनमेकैकं] emd; नाडीषोधनमेकैकं - C1; नाडीशोधनमेवैकं - B7; नाडी शोधनमेवैकं - edN; नादीशोधनमेवैकं - C7
9. कार्यं नाडीद्वितीयकम्] C1; कार्य नाडीद्वितीयकं- B7, edN,C7
10. तृतीयं] C1, B7; तृतीये - edN,C7
11. धारणावंशं] C1, edN,C7; धारणावंश - B7
12. पञ्चमम्] C1, पञ्चमं - edN,C7; पञ्चम - B7
13. कर्माणि] B7, C1, edN; कर्मानि - C7
14. शोधयेन्नाडी] C1, B7, C7; शोधयेन्नाडीः – edN

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पादाङ्गुष्ठतलं यावदपानाख्येन वायुना।
ऊर्ध्वभागमुदानेन त्रिभिरेवं विशोधयेत्[1] ।। 4.43 ।।

अथवा शोधनोपायः[2] प्रकारान्तरमुच्यते।
अङ्गुल्यग्रेण[3] संरुध्य दक्षिणं नासिकापुटम्।। 4.44 ।।

वामेनाकृष्य पवनं देहमापूर्य[4] धारयेत्।
ततो विरेचयेत्सर्वं[5] दृतिवद्दक्षिणेन तु[6] ।। 4.45 ।।

तथैव विपरीतञ्च कुर्याद्योगी पुनः पुनः।
नाडीशोधननामानि[7] प्रथमं परिकीर्त्तितम्[8] ।। 4.46 ।।

ॐ इत्येकाक्षर[9] सम्यक् समुच्चार्य विचक्षणः।
हठादाकर्षयोत्प्राणान् अधोभाग[10] व्यवस्थितान्।। 4.47 ।।

सर्वान्[11] संहृत्य हृदये वत्तुलीकृत्य धारयेत्।
ॐ कारं पुनरुच्चार्य कपालान्त[12]मुदीरयेत्।। 4.48 ।।

---

1. विशोधयेत्] B7, edN,C7; विचिन्तयेत् - C1
2. शोधनोपायः] C1, B7; साधनोपायः - edN,C7
3. अङ्गुल्यग्रेण] C1, B7, C7; अङ्गुलाग्रेण – edN
4. देहमापूर्य] C1, B7, C7; देहमापुर्य – edN
5. ततो विरेचयेत्सर्वं] C1, edN,C7; ततो विरेचयेत्स. .(not readable) - B7
6. दृतिवद्दक्षिणेन तु] C1 (not readable), edN,C7; not readable - B7
7. नाडीशोधननामानि] emd; नाडीशोधननामानं - C1, B7, C7; नाडी शोधन नामैनं – edN
8. परिकीर्त्तितम्] C1; कर्म कीर्त्तितं - B7; edN,C7
9. ॐ इत्येकाक्षरं] C1, edN; ओमित्येकाक्षरं - B7, C7
10. अधोभागo] C1, B7; अधोभागे - edN; अधोभागां - C7
11. सर्वान्] C1, edN,C7; सर्वा - B7
12. कपालान्तo] B7, edN,C7; कपालान्ताo - C1

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मूर्ध्नि क्षणं धारयित्वा[1] प्रतीपम[2]पकर्षयेत्।
पुनस्तेनैव[3] मार्गेण हृदये स्थापयेन्मुहुः।।4.49।।
ततो विनिश्वसेद्योगी[4] नासिभ्यां शनैः शनैः।
इदं कर्म द्वितीयं स्यात्[5] कार्यनाडीति[6] संज्ञितम्।।4.50।।
नाडीसञ्चारमार्गेषु[7] पादाङ्गुष्ठादिपर्वसु।
ॐ कारेण समुत्कर्षन्नेकैकस्मिन्[8] पृथक् पृथक् ।।4.51।।
ध्यात्वा ध्यात्वा विधार्येत[9] परिपाट्या यथाक्रमम्।
शाखा[10]स्ववस्थितान् सर्वान् संक्षिप्य स्थापयेद्धृदि।।4.52।।
तथैव पुनरुद्धृत्य प्राणानुरसि धारयेत्।
ततः कण्ठे च जिह्वायां नासिकायान्तु चक्षुषि[11] ।।4.53।।
ललाटे मस्तकं यावदुत्क्षिप्योत्क्षिप्य[12] धारयेत्।
एवमेव क्रमाद्वायुं[13] प्रतीपमपकर्षयेत्।।4.54।।

---

1. धारयित्वा] B7, C1, edN; धरयित्वा - C7
2. प्रतीपमo] C1, edN; पतीर्यमo - B7; प्रतीपकमo - C7
3. पुनस्तेनैव] C1, B7; ततस्तेनैव - edN; पुनCनैव - C7
4. विनिश्वसेद्योगी] C1, edN; निविस्वसेद्योगी - B7; विनिस्वणेद्योगी - C7
5. द्वितीयं स्यात्] C1, edN; द्वितीय - B7; द्वितीयं स्या - C7
6. कार्यनाडीति] C7; कार्यन्नाडीति - C1; कार्यनाडीभि - B7; काय्यनाडीतिo – edN
7. नाडीसञ्चारमार्गेषु] B7, C1, edN; नाडीसञ्चारमार्गे - C7
8. समुत्कर्षन्नेकैकस्मिन्] edN; समुत्कर्षमैकैकस्मिन् - C1, C7; समुत्कर्षन्मेकैकस्मिं - B7
9. विधार्येत] C1, B7, C7; विधार्येव – edN
10. शाखाo] C1, edN,C7; साखाo - B7
11. चक्षुषि] C1, C7; चक्षुसि - B7, edN
12. यावदुत्क्षिप्योत्क्षिप्य] C1, B7, C7; यावदुत्क्षियोत्क्षिप्य – edN
13. क्रमाद्वायुं] C1, edN,C7; क्रामाद्वायुं - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ततः प्राणं हृदि[1] स्थाप्य शनैर्योगी[2] विनिश्वसेत्[3]।
तृतीयं कर्म निर्दिष्टं धारणावंशयोजनम्[4]।।4.55।।

एवं प्रतिदिनाभ्यासैर्नाडी कार्यक्षमा[5] भवेत्।
अन्यत्[6] कर्मान्तरं गुह्यं ततो योगी समारभेत्।।4.56।।

इडा[7] वामा सुषुम्णा[8] च द्वे नाडी नासिकाश्रिते[9]।
भ्रुवोर्मध्ये[10] परा[11] नाडी तज्ज्ञस्तुर्येति[12] कीर्त्तिता।।4.57।।

ताभ्यां विनिर्गतेः प्राणो[13] भवबन्धनमुच्यते।
तुर्यया यस्तु निर्यातो योगी योगफलं[14] लभेत्।।4.58।।

नव स्त्रोतांसि[15] यत्नेन निरुध्य मनसा पुनः।
सुदीर्घन्नादमुच्चार्य[16] तुर्यस्थानं समाविशेत्।।4.59।।

---

1. हृदि] B7, C1, edN; हृति - C7
2. शनैयोगी] edN,C7; शनैयोगी - C1, B7
3. विनिश्वसेत्] C1, edN; विनिस्वसेत् - B7; विनिये/से?त् - C7
4. धारणावंशo] C1, edN,C7; धारणावशo - B7
5. oभ्यासैनाडी] C1, edN,C7; oभ्यासैनाडी - B7
6. अन्यत्] C1, B7; अथ - edN; अन्य - C7
7. इडा] B7, C1, edN; ईडा - C7
8. सुषुम्णा] edN; शुषुम्ना - C1; सुसुम्ना - B7; सुषुम्ना - C7
9. द्वे नाडी नासिकाश्रिते] C1, B7; नाड्यास्ता नासिकाक्षितोः - edN; द्व नाड्यौ नासिकाश्रिते - C7
10. भ्रुवोर्मध्ये] edN; भ्रुवोमध्ये - C1, B7, C7
11. परा] C1, edN,C7; परी - B7
12. तज्ज्ञस्तुर्येति] B7; तज्ज्ञस्तुर्यैस्तु - C1; तज्ज्ञैस्तुर्येति - edN,C7
13. विनिर्गतेः प्राणो] C1, C7; विनिर्गतप्राणो/णै? - B7; विनिर्गत प्राणो१. – edN
14. योगफलं] C1, edN,C7; योगफ्ल - B7
15. स्त्रोतांसि] emd; तांतासि - edN; श्रोतांसि - C1; श्रोतांशि - B7; श्रोत्रांसि - C7
16. सुदीर्घन्नादमुच्चार्य] C1; सुदीर्घनादमुच्चार्य - B7, edN,C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यावन्नासाद्यते योगी[1] योगमार्गं स्वमस्तके।
तावत्सम्यक् प्रकुर्वीत द्वित्रिवारान्दिने दिने[2]।।4.60।।

बहुवारं न[3] कुर्वीत क्रमयोगेन भेदयेत्[4]।
हठसाध्यं[5] न कर्त्तव्यमखेदेनैव[6] साधयेत्।।4.61।।

अभ्यासेन यथा लक्ष्यं धानुष्को विध्यते[7] शरैः[8]।
तथैवान्वेषयेत्प्राणैर्मार्गं[9] योगी स्वमस्तके।।4.62।।

आसाद्यते[10] यदा योगी तुर्यस्थानं विचक्षणः।
प्राणं प्रतीपमाकृष्य[11] हृदये धारयेत्पुनः।।4.63।।

तन्मार्गेण[12] विनिःसृत्य[13] क्षणं स्थित्वा निवर्त्तयेत्।
उपरिष्टात्ततो योगी स्तोकं स्तोकं क्रमेण तु।।4.64।।

---

1. यावन्नासाद्यते योगी] C1, B7; यावन्नासादयेत् योगी - edN; यावन्नाशा(with correction mark)द्य तया जोगी - C7
2. द्वित्रिवारान्दिने दिने] C1, B7; द्वित्रिवारं दिने दिने - edN; दितिवारान्दिने दिने - C7
3. बहुवारं न] edN,C7; बहुवारन्न - C1; बहुवारन्न - B7
4. भेदयेत्] C1, B7; साधयेत् - edN,C7
5. हठसाध्यं] C1, edN,C7; हठशाध्यं - B7
6. oमखेदेनैव] C1, B7, C7; oमखेदेनैष – edN
7. विध्यते] C1, B7; भेदयेत् - edN; भिद्यते - C7
8. शरैः] B7, edN,C7; शनैः - C1
9. तथैवान्वेषयेत्प्राणैर्मार्गं] edN,C7; तथैवान्वेषयेत्प्राणैर्मार्ग - C1; तथैवान्वेषयेत्प्राणेमार्ग - B7
10. आसाद्यते] C1, B7, C7; आसादयेद् – edN
11. प्रतीपमाकृष्य] B7, edN; प्रतीपमाष्यन्ते - C1; प्रतीयमाकृष्य - C7
12. तन्मार्गेण] C1, C7; तत्मार्गेण - B7; तन्मागेर्णा – edN
13. विनिःसृत्य] edN,C7; विनिसृत्य - C1; विंनिसृत्य - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अर्चिर्धूमशिखां[1] यावद्गत्वा गत्वा निवर्तते[2]।
उद्रेचनीति विख्याता चतुर्थ[3] कर्म कीर्त्तितम्।।4.65।।

एवं[4] सततमभ्यस्य[5] योगी कालमपेक्षते[6]।
अनिष्टञ्च[7] स्वदेहे तु नित्यमेव निरूपयेत्।।4.66।।

अरिष्टञ्च[8] यदा पश्येन्मृत्युरूपं सुदारुणम्।
तदा देहपरित्यागं कर्त्तु कर्म[9] समारभेत्।।4.67।।

नागाख्यः[10] कृकरः कूर्मो देवतत्तो धनञ्जयः।
विकुर्वते मुमूषूर्णां[11] पञ्चैते[12] वायवोऽपरे[13]।।4.68।।

आसन्नमृत्युर्मनुजो[14] गाढं निश्वसते[15] यदा।
एतन्नागाभिधानस्य वायोर्लिङ्गमुदाहृतम्[16]।।4.69।।

---

1. अर्चिर्धूमशिखां] edN; अर्चि धूमशिखं - C1; अर्चि धूमशिख - B7; अर्चिर्धूमशिखं - C7
2. निवर्तते] edN; निवर्तयेत् - C1, B7, C7
3. चतुर्थं] C1, C7; चतुर्थ - B7, edN
4. एवं] C1, B7, C7; एतां – edN
5. सततमभ्यस्य] B7, C1, edN; शतं मभ्यस्य - C7
6. कालमपेक्षते] C1; कालमुपेक्षयेत् - B7; कालमपेक्षणात् - edN; कालमपेक्षयेत - C7
7. अनिष्टञ्च] B7; अरिCञ्च - C1; अरिष्टन्तु - edN,C7
8. अरिष्टञ्च] C1, B7, C7; अरिष्टन्तु – edN
9. कर्त्तु कर्म] B7, C1, edN; कर्त्तु कर्मा - C7
10. नागाख्यः] C1, edN; नागाख्य - B7; नांगाख्यः - C7
11. विकुर्वते मुमूषूर्णां] C1, edN; मुर्मूषणां विकुर्वन्ते - B7; विकुर्वते मुमूखार्णा - C7
12. पञ्चैते] B7, C1, edN; पञ्चिते - C7
13. वायवोऽपरे] C1; वायवोपरे - B7, C7; वामवोऽपरे – edN
14. oमृत्युर्मनुजो] C1, edN,C7; oमृत्युमनुजो - B7
15. गाढं निश्वसते] C1, edN; गाढं निस्वशते - B7; गाढ निस्वसत - C7
16. वायोर्लिङ्गo] B7, C1, edN; वायोल्लिङ्गo - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ततो मर्माणि[1] संच्छिद्य पर्व पर्व यथाक्रमम्।
यदा सन्त्यज्यते प्राणैर्विकारः[2] कृकरस्य च[3]।।4.70।।

शाखास्ववस्थितान्[4] सर्वान्[5] संहृत्य हृदये सदा[6]।
वर्त्तते[7] चोत्तरादूर्ध्वमेतत्कूर्मस्य[8] लक्षणम्।।4.71।।

ततो निश्चलदेहस्य कण्ठो[9] घुरुघुरायते[10]।
इदन्तु देवदत्तस्य वोयोर्लिङ्गं[11] प्रकीर्तितम्।।4.72।।

यदा धनञ्जयो नाम[12] वायुराजा[13] विकुर्वते[14]।
तच्छरीरं परित्यज्य जीवो लोकान्तरं[15] व्रजेत्।।4.73।।

यद्यत्तदा[16] चिन्तयते प्रेरितः पूर्वकर्मणा।
पुण्यापुण्यफलैर्युक्तस्तत्र[17] तत्रोपपद्यते[18]।।4.74।।

---

1. मर्माणि] C1, edN; मार्गाणि - B7; कर्माणि - C7
2. प्राणैर्विकारः] C1, edN; प्राणैर्विकारं - B7, C7
3. कृकरस्य च] C1, B7, C7; कृकलस्य सः – edN
4. शाखास्ववस्थितान्] edN; शाखास्ववस्थिताः - C1, B7, C7
5. सर्वान्] edN; सर्वे - C1, B7, C7
6. सदा] C1, मवः - B7; यदा - edN,C7
7. वर्त्तते] C1, edN,C7; वर्त्तन्ते - B7
8. चोत्तरादू०] C1, edN,C7; चोदरादू० - B7
9. कण्ठो] C1; कण्ठे - B7, edN,C7
10. घुरुघुरायते] C1, C7; घुरघुरायते - B7, edN
11. वोयोर्लिङ्गं] B7, edN,C7; वोयोर्लिङ्ग - C1
12. धनञ्जयो नाम] C1, edN,C7; धनञ्जयो धनाम - B7
13. वायुराजा] C1, B7; वायुराजो - edN,C7
14. विकुर्वते] B7, C7; विवकुते - C1; विकारकः – edN
15. लोकान्तरं] B7, C1, edN; रोकाञ्चरं - C7
16. यद्यत्तदा] C1, edN,C7; यं यं तदा - B7
17. पुण्यापुण्य०] C1, B7, C7; पुण्या पुण्य० – edN
18. तत्रोपपद्यते] B7, edN,C7; तत्रो प्रपद्यते - C1

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अष्टासु[1] परदेहादिब्रह्मलोकान्तपर्वसु।
मध्ये यद्रोचते[2] गन्तुं[3] लक्षन्तत्परिकल्पयेत्[4]।।4.75।।

यथा[5] दृष्ट्या धनुष्पाणिर्लक्षमेव[6] निरीक्षयेत्[7]।
तथैव परदेहादीन् ध्यायेच्चित्तेन[8] योगवित्।।4.76।।

तदेव मनसा ध्यायेदूर्ध्वस्त्रोतांसि[9] यत्नतः।
सुदीर्घं व्याहरेन्नादमविच्छिन्नानुगं[10] ध्वनिम्।।4.77।।

सकृदुच्चारितेनैव यथालक्ष्यं[11] प्रपद्यते।
यथानादं[12] समुच्चार्य शरवत्प्रेरयेदसून्[13]।।4.78।।

जितलक्षो हि धानुष्कः[14] शरेणैकेन[15] घातयेत्।
तथैव[16] जितयोगोऽपि नादेनैकेन[17] यास्यति।।4.79।।

---

1. अष्टासु] C1, B7, C7; अष्टात्सु – edN
2. यद्रोचते] edN,C7; य रोचते - C1, B7
3. गन्तुं] edN,C7; सन्तु - C1; गन्तु - B7
4. लक्षन्तत्परिकल्पयेत] C1, edN; लक्षन्तपरिकल्पयेत् - B7; लक्ष्यन्तत्परिकल्पिता - C7
5. यथा] C1, B7, C7; यदा – edN
6. धनुष्पाणिर्लक्षमेव] emd; धनुःष्पाणिर्लक्षमेव - C1; धनुष्पाणिलक्षमेवं - B7; धनुष्पाणिर्लक्षमेकं - edN; धनुष्पानिर्लक्षमेकं - C7
7. निरीक्षयेत्] edN,C7; निक्षयेत् - C1; निरीक्षते - B7
8. ध्यायेच्चित्तेन] B7, edN,C7; ध्यायेचित्तेन - C1
9. ध्यायेदूर्ध्वांतांसि] edN,C7; ध्यायेदूर्ध्वश्रोतांसि - B7; ध्यायेद्रुद्ध्वा श्रोतांसि - C1
10. oमविच्छिन्नानुगं] C1, edN; oमवच्छिन्नातुगं - B7; oमविच्छिन्नानुग - C7
11. यथालक्ष्यं] C1, B7, C7; यथा लक्ष्यं – edN
12. यथानादं] B7; यदा नादं - edN,C7; Line missing - C1
13. शरवत्प्ररयेदसून्] edN; सरवत्प्ररयेदशून् - B7, C7; Line missing - C1
14. धानुष्कः] C1, B7; धानुष्काः - edN; धानुष्क - C7
15. शरेणैकेन] B7, edN,C7; शरेनैकेन - C1
16. तथैव] B7, edN,C7; तथै - C1
17. नादेनैकेन] B7, edN,C7; नादैनेकेन - C1

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

एवं परित्यजं देहं योगी योगफलं[1] लभेत्।
इदन्तु पञ्चमं[2] कर्म प्रलयोत्क्रान्तिसंज्ञितम्[3]।।4.80।।

प्रथमं तु गुणैश्वर्यं ततः परपुरञ्जयम्।
तृतीयं[4] मोक्षमित्युक्तमेतद्योगफलत्रयम्[5]।।4.81।।

अणिमादिगुणाष्टानां[6] मध्ये यं प्राप्तुमिष्यते।
तं गुणं मनसा ध्यात्वा योगी देहं परित्यजेत्।।4.82।।

गुणेन तेन संयुक्तो भूत्वा जायेत योगवित्।
गुणैश्वर्यमिति[7] प्रोक्तं योगस्य प्रथमं फलम्।।4.83।।

यदा जराभिभूतत्वात्[8] स्वदेहं त्यक्तुमिष्यते।
अन्वेषयेत्तदा[9] योगी कञ्चिन्मृतकलेवरम्[10]।।4.84।।

अङ्गावयवसम्पूर्णं कुलरूपसमन्वितम्[11]।
तं देहं[12] मनसा ध्यात्वा योगं कुर्वीत[13] योगवित्[14]।।4.85।।

---

1. योगफ्लं] B7, edN,C7; योगफ्ल - C1
2. पञ्चमं] C1, edN,C7; पञ्चम - B7
3. संज्ञितम्] C1; सज्ञितं - B7; संज्ञितं - edN; संज्ञितः - C7
4. तृतीयं] B7, edN,C7; तृतीय - C1
5. oद्योगफ्लत्रयम्] emd; oद्योगफ्लत्रयं - B7, edN,C7; oद्योगफन्नयम् - C1
6. अणिमाo] B7, C1, edN; अनिमाo - C7
7. गुणैश्वर्यमिति] B7, edN,C7; गुणेरार्यमिति - C1
8. जराभिभूतत्वात्] C1, edN; जराभि - B7; जराविभूतत्वात् - C7
9. अन्वेषयेत्तदा] B7, edN,C7; अन्वेषयेतदा - C1
10. कञ्चिन्मृतo] edN,कश्चिन्मृतo - C1, B7; कश्चिमृतo - C7
11. कुलरूपसमन्वितम् - C1; कुलरूपवयोन्वितं - B7च कुलरूपसमन्वितं- edN; कुररूपसमन्वितं - C7
12. तं देहं] C1, B7; तद्देहं - edN,C7
13. कुर्वीत] C1, B7, C7; कुर्वति – edN
14. योगवित्] C1; पूर्ववत् - B7, edN,C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

गर्भवासपरिक्लेश[1]शिशुभावविवर्जितम्[2]।
द्वितीयं फलमित्युक्तं[3] नाम्ना परपुरञ्जयः[4]।।4.86।।

निराश्रयेण[5] चित्तेन ज्ञानमात्रावलम्बिना[6]।
न किञ्चिदपिसंचिन्त्य[7] यदि देहं परित्यतेत्।।4.87।।

स प्रयाति परं ब्रह्म[8] सर्वदुःखान्तमव्ययम्।
तृतीयं फलमित्युक्तं मोक्षं नैरञ्जनं[9] फलम्।।4.88।।

इति धर्मपुत्रिकायां संहितायां[11] ध्यानमार्गप्रकरणं नाम[12] चतुर्थः पटलः[13]।। चत्वारि योगप्रकरणानि[14] समाप्तानि।।

---

1. गर्भवासपरिक्लेश] C1; गभार्वासपरिक्लेश - B7; गर्भवासपरि क्लेश - edN; गर्भवासपरिक्लेशं - C7
2. शिशुभावo] edN,C7; शिषुभावo - C1; शिसुभावo - B7
3. फ्लमित्युक्तं] C1, B7, C7; फ्लमित्युक्त – edN
4. परपुरञ्जयः] B7, edN,C7; परपुरञ्जयम् - C1
5. निराश्रयेण] B7, edN; निराश्रयेन - C1, C7
6. ज्ञानमात्रावलम्बिना] edN; ज्ञानमात्राविलम्बिना - C1, C7; ज्ञानमात्रावलम्बिता - B7
7. किञ्चिदपि] C1, edN,C7; कञ्चिदपि - B7
8. संचिन्त्य] B7, C1, edN; सन्त्यज्य - C7
9. प्रयाति परं ब्रह्म] B7, edN,C7; याति परमं ब्रह्म - C1
10. नैरञ्जनं] C1, edN,C7; नैरञ्जन - B7
11. इति धर्मपुत्रिकायां संहितायां] edN; धर्मपुत्रिकायां – C1; धर्मपुत्रिकायां संहितायां - B7, C7
12. ध्यानमार्गप्रकरणं नाम] C1, edN,C7; ध्यानमार्गप्रकर ना - B7
13. चतुर्थः पटलः] C1, edN,C7; चतुर्थपटलः - B7
14. योगप्रकरणानि] edN,C7; योगप्रकरणानि समानि - C1; योगपकरणानि - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पञ्चमः पटलः

अथान्तरायाश्चतुर्विधाः। सूक्ष्मान्तरायो[1] महासूक्ष्मान्तरायः[2] प्रमादजान्तरायः प्रतिभाद्यन्तरायश्चेति[3]।

युञ्जन्तो[4] योगिनः प्राया जायन्ते विघ्नहेतवः[5]।
तस्माज्जयचिकित्साश्च[6] ज्ञातव्या योगिनः[7] सदा।। 5.1 ।।

मित्रं लक्ष्मीर्धनं कान्ता शिष्योपाध्यायबान्धवाः[8]।
सूक्ष्मान्तराया[9] इत्युक्ता देवैरपि सुदुर्जयाः[10]।। 5.2 ।।

निबद्धाः[11] स्नेहपाशेन[12] विषयास्वादतत्पराः[13]।
ऋषयः पितरो देवा मुह्यन्तेऽत्र[14] सुखेप्सवः।। 5.3 ।।

---

1. सूक्ष्मान्तरायो] B7, C1, edN; सूक्ष्मन्तरोयः - C7
2. महासूक्ष्मान्तरायः] B7, C1, edN; missing - C7
3. प्रतिभाद्यन्तरायश्चेति] C1, edN,C7; प्रतिभान्त?न्तरायश्चेति - B7
4. युञ्जन्तो] B7; युञ्जतो - C1, edN,C7
5. जायन्ते विघ्नहेतवः] C1, B7; जायन्ते विघ्न हेतवः - edN; जायते विघ्नहेतवः - C7
6. चिकित्साश्च] edN; चिकित्सा च - C1, B7; चिकित्साञ्च - C7
7. ज्ञातव्या योगिनः] B7; ज्ञातव्या योगिन - C1; ज्ञातव्या योगिना - edN; ज्ञातव्यं योगिनः - C7
8. मित्रं लक्ष्मीर्धनं कान्ता शिष्योपाध्यायबान्धवाः] edN; मित्र-लक्ष्मी-धनं-कान्ता-शिष्योपाध्यायबान्धवाः - C1, B7; मित्रं लक्ष्मी धनं कान्ता शिष्योपाध्यायबान्धवाः - C7
9. सूक्ष्मान्तराया] edN; सूक्ष्मान्तराय - C1, C7; सूक्ष्मन्तराय - B7
10. सुदुर्जयाः] C1, edN,C7; सुदुजयाः - B7
11. निबद्धाः] C1, edN; निबद्धा - B7, C7
12. स्नेहपाशेन] edN,C7; स्नेहपासेन - C1, B7
13. विषयास्वादतत्पराः] B7, C1, edN; विषयास्वदतत्पराः - C7
14. मुह्यन्तेऽत्र] B7, C1, edN; मुह्यन्त्यत्र - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पश्यन्तोऽपि[1] महात्मानो विद्वांसो दिव्यचक्षुषा[2]।
प्रसक्ताः[3] सूक्ष्मभावेषु[4] नाप्नुवन्ति पराङ्गतिम्।। 5.4।।

तांस्तु[5] सर्वांस्तदा[6] योगी सिद्धेर्व्याक्षेपकारकान्[7]।
अन्तराय इति[8] ज्ञात्वा मनसा परिवर्जयेत्[9]।। 5.5।।

इति धर्मपुत्रिकायां संहितायां[10] सूक्ष्मान्तराया नाम पञ्चमः पटलः[11]।।

---

1. पश्यन्तोऽपि] C1; दृश्यन्तोऽपि - B7; पश्यन्तो - edN; प्रपश्यन्तो - C7
2. दिव्यचक्षुषा] C1, edN,C7; दिव्यचक्षुसा - B7
3. प्रसक्ताः] C1, edN; प्रशक्ता - B7; प्रशक्त - C7
4. सूक्ष्मभावेषु] C1, B7; सूक्ष्मभावेन - edN,C7
5. तांस्तु] C1, edN; तां तु - B7; तान्तु - C7
6. सर्वांस्तदा] B7, edN; सर्वान्तदा - C1; सर्वांतदा - C7
7. सिद्धेर्व्याक्षेपकारकान्] C1, C7; सिद्धेव्याक्षेपकारकान् - B7; सिद्धर्थाक्षेपकारकान् – edN
8. अन्तराय इति] B7; अन्तरायानिति - C1, edN,C7
9. परिवर्जयेत्] B7, edN,C7; परिवर्तयेत् - C1
10. इति धर्मपुत्रिकायां संहितायां] edN; धर्मपुत्रिकायां – C1; धर्मपुत्रिकायां संहितायां - B7, C7
11. पञ्चमः पटलः] C1, B7, C7; पञ्चम पटलः – edN

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

षष्ठः पटलः

कदाचित्पापसामग्र्यात्तारुण्येष्वेव[1] देहिनाम्।
आसन्नमृत्यवोऽरिष्ट्रा[2] जायन्ते पूर्वकर्मजाः[3]।।6.1।।

योगसिद्धिर्भवेन्नैव[4] मरणञ्चेद्भविष्यति[5]।
महासूक्ष्मान्तरायोऽयं कीर्त्तितस्तत्त्वदर्शिभिः[6]।।6.2।।

भयं तत्र[7] न गृह्णीयादभ्यासञ्च न मुञ्चयेत्।
योगिनो[8] यन्तदा युक्त[9] कार्यं श्रीघ्रं समारभेत्।।6.3।।

अरिष्टं द्विविधं प्रोक्तं बाह्यमध्यात्ममेव च।
बाह्यन्तावत्प्रवक्ष्यामि यदुक्तन्तत्त्वदर्शिभिः।।6.4।।

अकस्मादेव यः पश्येत्पुरुषं[10] कृष्णपिङ्गलम्।

---

1. कदाचित्पापसामग्र्यात्तारुण्येष्वेव] C1, B7, C7; कदाचित्पापसामर्थ्यात्तारुण्ये ह्येव – edN
2. आसन्नमृत्यवोऽरिC1] emd; आसन्नमृत्यवोरिC1 - C1, B7; आसन्नमृत्युश्चारिC1 - edN; आसन्नमृत्युचारिष्ठा - C7
3. पूर्वकर्मजाः] B7, edN,C7; वा?र्वकर्मजाः - C1
4. योगसिद्धिर्भवेन्नैव] B7, edN; योगसिद्धिसिर्भवेन्नैव - C1; यगसिद्धिभवेन्नैव - C7
5. मरणञ्चेद्भविष्यति] B7, edN,C7; मरणञ्चैद्भविष्यति - C1
6. कीर्त्तितस्तत्त्वदर्शिभिः] B7, C1; edN; कीर्त्तितंन्तत्त्वदर्शिभिः - C7
7. भयं तत्र] C1, edN; भयन्त्रत - B7; भयन्तत्र - C7
8. योगिनो] C1, B7, C7; योगिना – edN
9. यन्तदा युक्तं] C1, B7; यत्तदा युक्तं - edN,C7
10. पश्येत्] B7, C1, edN; पश्ये - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

तस्य वर्षत्रयादूर्ध्वं[1] न भवेदायुरात्मनः।। 6.5।।

विरश्मिं[2] स्वच्छमेवैतन्मध्याह्ने[3] सूर्यमण्डलम्[4]।
यः पश्येत्तेन विज्ञेयं द्विवर्षे[5] मरणं भवेत्।। 6.6।।

अरुन्धतीं[6] ध्रुवञ्चैव सोमच्छायां[7] महापथम्।
यो न पश्येन्न जीवेत्स[8] नरः संवत्सरात्परम्[9]।। 6.7।।

मध्ये चन्द्रमसं छिद्रं गन्धर्वनगराणि[10] च।
रुग्णशाखाद्रुमं[11] पश्येद्दशमासान्[12] स जीवति।। 6.8।।

छर्दिमूत्रपुरीषाणि[13] यस्य हेमरजो भवेत्।
प्रत्यक्षमथवा स्वप्ने त्वष्टौ[14] मासान् स जीवति।। 6.9।।

रक्तगन्धानुलिप्ताङ्गं[15] रक्तपुष्पैरलंकृतम्।
तैलाभ्यक्तन्तथा[16] देहं मुण्डितं रक्तवाससम्।। 6.10।।

---

1. वर्षत्रयादूर्ध्वं] C1, C7; वर्षत्रयादूर्ध्व - B7, edN
2. विरश्मिं] emd; विरस्मिं - C1; विरश्मि - B7, edN; विरस्मि - C7
3. स्वच्छमेवैतन्मध्याह्ने] B7, C1, edN; स्वच्छमेवैतमध्याह्ने - C7
4. सूर्यमण्डलम्] B7, C1, edN; सूर्यमण्डले - C7
5. द्विवर्षे] B7; द्विवर्ष - C1, C7; द्विवर्षात् – edN
6. अरुन्धतीं] edN; अरुन्धती - C1, C7; अरुद्वती - B7
7. सोमच्छायां] C1, edN; सोमच्छाया - B7, C7
8. जीवेत्स] C1, B7; जीवेत - edN,C7
9. नरः संवत्सरात्परम्] B7, edN; नरः त्सम्वरात्परम् - C1; नर सम्वत्सरात्परं - C7
10. गन्धर्वनगराणि] B7, C1, edN; गन्धर्वनगरानि - C7
11. रुग्णशाखाo] emd; रुग्मशाखाo - C1, B7; युग्मशाखाo - edN; रुग्मसाखाo - C7
12. oमासान्] B7, C1, edN; oमासं - C7
13. छर्दिo] C1, B7, C7; छद्दिo – edN
14. त्वष्टौ] B7, edN; त्वष्टा/ष्टो? - C1; त्वष्टे - C7
15. रक्तगन्धानुलिप्ताङ्गं] C1, edN,C7; रक्तगन्धानुलिप्ताङ्ग - B7
16. तैलाo] B7, C1, edN; तेलाo - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

गर्दभारूढमात्मानं[1] गच्छन्तं दक्षिणां[2] दिशम्।
यः पश्येदीदृशं स्वप्ने[3] षण्मासं[4] तस्य जीवितम्।। 6.11।।

आरुह्य मस्तके यस्य कृकलासः[5] प्रवेगवान्।
धारयेत्त्रीणि[6] वर्णानि पञ्च मासं[7] स जीवति।। 6.12।।

पृष्ठतो ह्यग्रतो वापि यदि खण्डपदं[8] भवेत्।
कर्दमे पांशवे वापि[9] चतुर्मासं स जीवति।। 6.13।।

सलोहदण्डपुरुषं[10] कृष्णं[11] कृष्णपरिच्छदम्[12]।
यः पश्येत्पार्श्वतः[13] स्वप्ने त्रयो मासं[14] स जीवति।। 6.14।।

स्नानमात्रस्य[15] यस्याशु[16] हृत्पादौ च विशुष्यतः[17]।
धूमो[18] वा मस्तकेन स्याद्[19] द्वौ मासौ स तु[20] जीवति।। 6.15।।

---

1. गर्दभारूढ] C1, B7, C7; गर्दभारुढ – edN
2. दक्षिणां] C1, edN,C7; दक्षिण - B7
3. स्वप्ने] C1; रूपं - B7, edN,C7
4. षण्मासं] C7; षड्मासं - B7; षण्मासान् - C1
5. कृकलासः] edN,C7; कृकलास - B7; कृकलाशः - C1
6. धारयेत्त्रीणि] B7, edN; धारयेत्रिणि - C1, C7
7. पञ्चमासं] B7, C7; पञ्च मासान् - C1; पञ्च मासं - edN
8. खण्डपदं] C1, B7, C7; खण्डं पदं – edN
9. पांशवे वापि] B7; पांसुदेवाय - C1; पांसवे चापि - edN; पांसवे वापि - C7
10. सलोह] C1, edN,C7; षलोह - B7
11. कृष्णं] edN; कृष्ण - C1, B7; कृषंष्णंड्डष/कृष्णंश्चष - C7
12. कृष्णपरिच्छदम्] emd; कृष्णपरिच्छदं - B7, edN,C7; कृष्णपरिच्छद - C1
13. पार्श्वतः] C1, B7, C7; पटर्यतः[पर्यटतः] – edN
14. त्रयो मासं] B7, C7; त्रयो मासान् - C1; मासत्रयं – edN
15. स्नानमात्रस्य] C1, B7, C7; स्नातमात्रस्य – edN
16. यस्याशु] C1, edN,C7; यस्यासु - B7
17. विशुष्यतः] edN; विशुष्यति – C1, C7; विसुष्यति - B7
18. धूमो] C1, edN; धूमं - B7, C7
19. मस्तकेन स्याद्] C1, B7; मस्तके तस्य - edN; मस्तके तस्या - C7
20. द्वौ मासौ स तु] edN,C7; द्वौ मासा स तु - C1; द्वौ तु मासौ स - B7

CENTRE FOR SHAIVA STUDIES Pondicherry

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

हंसकाकमयूराणामेकीभूतं[1] प्रपश्यति।
अनभ्रे विद्युतं पश्येच्छक्रचापं[2] तथाम्भसि[3]।।6.16।।

अङ्गारं गृह्य[4] वक्त्रेण[5] काको वा मस्तके पतेत्।
क्रव्यादो वा खगो वापि मासमेकं स जीवति।।6.17।।

अप्सु वा यदि वाऽऽदर्शे[6] आत्मानं[7] यो न पश्यति।
छायां वाप्यशिरां[8] पश्येदर्धमासं स जीवति।।6.18।।

यस्य नेत्रे धकधके[9] कर्णः स्थानाच्च[10] भ्रश्यते[11]।
वक्रनासा[12] भवेद्यस्य सप्तरात्रं स[13] जीवति।।6.19।।

शवगन्धो[14] भवेद्यस्य[15] दन्तकर्षश्च जायते।
छायां वा विकृतां[16] पश्येत् त्रिरात्रं[17] तस्य जीवितम्।।6.20।।

---

1. oमेकीभूतं] B7, edN; oमेकीभावं - C1; एकीभूतं - C7
2. च्छक्रचापं] B7, edN,C7; च्छक्रचापनं - C1
3. तथाम्भसि] C1, B7; ततो निशि - edN,C7
4. गृह्य] B7, edN; गृह - C1; गृह्यक? - C7
5. वक्त्रेण] C1, edN,C7; वक्त्रेन - B7
6. यदि वादर्शे] edN; यदि वादर्शे - B7, C7; यदि दर्शे - C1
7. आत्मानं] C1, B7; चात्मानं - edN,C7
8. छायां वाप्यशिरां] B7; छाया वाप्यशिरः - C1; छायां वाऽप्यशिरः - edN; छायां वाप्यशिरः - C7
9. धकधके] C1, B7, C7; धङ्कधङ्के – edN
10. कर्णः स्थानाच्च] C1, edN; कर्णः स्थानाच - B7; कर्ण स्थानाच्च - C7
11. भ्रश्यते] C1, edN; भ्रस्यते - B7, C7
12. वक्रनासा] C1; चक्रा नाशा - B7; वक्रा नासा - edN,C7
13. स] C1, edN,C7; तु - B7
14. शवगन्धो] C1, edN,C7; शपगन्धो - B7
15. भवेद्यस्य] C1, edN,C7; भवेयस्य - B7
16. छायां वा विकृतां] C1, edN,C7; छाय वा विकृतं - B7
17. त्रिरात्रं] C1, B7, C7; त्रिराजं – edN

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यस्य कृष्णा खरा जिह्वा पद्मवर्णमुखं[1] भवेत्।
गण्डौ तु पिटकौ[2] रक्तौ दीपगन्धं[3] न जिघ्रति।।6.21।।

सम्भिद्य[4] मारुतो यस्य मर्मस्थानानि[5] भेत्स्यति[6]।
ज्योतिश्चैव न पश्येद्यो दिनमेकं स जीवति।।6.22।।

नासिकाकर्णदन्तानां चक्षुषी[7] वापि निर्गते[8]।
लुप्तसंज्ञो भवेद्यस्तु[9] सद्यो मृत्युरवाप्नुयात्[10]।।6.23।।

अध्यात्मिकं प्रवक्षामि[11] यदुक्तं तत्त्वदर्शिभिः।
यद्येकस्यां सुषुम्णायां[12] यदि मान्द्यं[13] प्रवर्त्तते।।6.24।।

दिनानि गणयित्वा तु[14] पञ्च दिक्[15] तिथि विंशतिः[16]।
तत्त्वान्येकाधिकं[17] पश्चाद्देवान्तानि[18] मनीषिणा[19]।।6.25।।

1. पद्मवर्णमुखं] C1, B7, C7; पद्मवर्णं मुखं – edN
2. पिटकौ] B7; पिठकौ - C1; पीतकौ - edN; पितकौ - C7
3. दीपगन्धं] C1, edN; दीपगन्ध - B7, C7
4. सम्भिद्य] C1, edN,C7; सभिद्य - B7
5. मर्मस्थानानि] C1, B7, C7; मर्मस्थानाच्च – edN
6. भेत्स्यति] B7; भेत्स्यते – C1; भ्रश्यते - edN; भत्स्यति - C7
7. चक्षुषी] C1, edN,C7; चक्षुसी - B7
8. निर्गते] C1, B7, C7; निर्गताः – edN
9. भवेद्यस्तु] C1, B7, C7; भवेद्यस्ते – edN
10. सद्यो मृत्युरवाप्नुयात्] B7; सद्योमृत्युं स गच्छति - C1, C7; सद्यो मृत्यु स गच्छति – edN
11. प्रवक्षामि] B7; प्रवक्ष्यामि - C1, edN,C7
12. सुषुम्णायां] edN; शुषुम्नायां - C1, C7; सुशुम्नायां - B7
13. मान्द्यं] edN; माद्य - B7, C7; माध्य - C1
14. गणयित्वा तु] C1, edN; गणयित्वा – B7; गनयित्वा तु - C7
15. पञ्च दिक्] C1, edN,C7; पञ्च दि - B7
16. विंशतिः] C1; विंशति - B7, edN,C7
17. तत्त्वान्येकाधिकं] B7, C1, edN; तत्वन्येकधिकं - C7
18. पश्चाद्देवान्तानि] C1, edN,C7; पश्चादेवन्तानि - B7
19. मनीषिणा] C1, edN,C7; मनीषिना - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ममायुरिति विज्ञेया[1] लोके नेत्रेन्दवः[2] समाः।
मासा ऋतु गुणं[3] ह्येका[4] परिपाट्या यथाक्रमम्।।6.26।।

तिथ्याशावानलोकाक्षिभूमयो[5] दिवसास्तथा[6]।
इडायां श्रावणै[7] वापि तथैवेति विनिर्दिशेत्[8]।।6.27।।

विपरीतस्वभावञ्च[9] प्रोक्तमध्यात्मकं[10] बुधैः।
दृष्ट्वारिष्टं तदा योगी प्रतीकारं[11] समारभेत्।।6.28।।

इति धर्मपुत्रिकायां संहितायां[12] महासूक्ष्मान्तरायो[13] नाम षष्ठः पटलः।।

---

1. विज्ञेया] C1, B7, C7; विज्ञेयं – edN
2. लोके नेत्रेन्दवः] C1, C7; लोकनेत्रेन्दवः - B7, edN
3. गुणं] C1; गुण - B7, edN,C7
4. ह्येका] C1 (conj); द्वेका (conj) - B7; त्वेका - edN,C7
5. तिथ्याशावानलोकाक्षिभूमयो] C1; तिथ्यायावानलोकाक्षिभूमयो - B7; तिथ्याया(का)सानलोकाक्षिभूमयो - edN; तिथ्यायासानलोकाक्षिभूमयो - C7
6. दिवसास्तथा] C1, edN, C7; दिवसस्तथा - B7
7. श्रावणै] C1; श्रावने - B7; श्रवणे - edN; श्रावणे -C7
8. विनिर्दिशेत्] C1, edN,C7; विनिर्दिंगेत् - B7
9. विपरीतस्वभावञ्च] C1, B7, C7; विपरीतस्वभावश्च – edN
10. प्रोक्तमध्यात्मकं] C1; प्रोक्तमध्यात्मिका - B7; प्रोक्तमध्यात्मिकं - edN,C7
11. प्रतीकारं] C1; प्रतिकारं – B7, edN,C7
12. इति धर्मपुत्रिकायां संहितायां] edN; धर्मपुत्रिकायां – C1; धर्मपुत्रिकायां संहितायां - B7, C7
13. महासूक्ष्मान्तरायो] C1; महासूक्ष्मान्तरायं – B7; महासूक्ष्मान्तराया - edN,C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सप्तमः पटलः

पञ्चैते[1] वायवो देहे नानामुखविनिःसृताः[2]।
धारणाक्रमयोगेन[3] कुयार्दूर्ध्वमुखसृतान्[4]।। 7.1।।

गिरिं[5] भित्त्वा यथा कश्चिज्जलमूर्ध्वं[6] प्रवर्त्तते।
मूर्धानन्तु[7] तथा भित्त्वा वायुरूर्ध्वं प्रवर्त्तते।। 7.2।।

एवं प्रवर्त्तमानोऽसौ[8] योगाभ्यासान्महानिलः।
शरीरं द्रुमवत्कृत्स्नमाकम्पयति योगिनः[9]।। 7.3।।

कदाचित्प्रदहेद्देहमुष्णो[10] भूत्त्वा प्रवर्त्तितः[11]।
अथवा शीतलो[12] भूत्त्वा कदाचिदुभयात्मकः[13]।। 7.4।।

1. पञ्चैते] C1, edN,C7; पञ्चैतै - B7
2. नानामुखविनिःसृताः] C1, edN; नानामुखविनिसृता - B7; नामामुखविनिःसृताः - C7
3. धारणाक्रमयोगेन] C1, edN,C7; धारणाक्रमयोगेण - B7
4. कुयार्दूर्ध्वमुखसृतान्] C1, edN; कुयार्दूर्ध्वमुखस्मृताः - B7; कुयार्दुर्ध्वमुखस्मृतां - C7
5. गिरिं] C1, edN,C7; सिरं - B7
6. कश्चिज्जलमूर्ध्वं] B7, C7; कश्चिकश्चिज्जलम् - C1; किञ्चिज्जलमूर्ध्वं – edN
7. मूर्धानन्तु] edN; मूर्द्धानन्तु - C1, C7; मूध्नानं तु - B7
8. प्रवर्त्तमानोऽसौ] C1, B7, C7; प्रवर्त्तमानेऽसौ – edN
9. योगिनः] C1, edN,C7; योगिन्य - B7
10. oप्रदहेद्देहमुo] C1, edN,C7; oप्रदहेदेहमुo - B7
11. प्रवर्त्तितः] B7, edN,C7; प्रवर्त्ततः - C1
12. शीतलो] edN,C7; सीतलो - C1, B7
13. कदाचिदुभयात्मकः] C1, edN,C7; कदादिदुभयात्मकः - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अजितं स्थानमाश्रित्य प्रमादाद्यदि[1] वर्त्तते।
तदा रोगाः प्रजायन्ते शरीरे विघ्नकारकाः।। 7.5।।

वातो गुल्म उदावर्त्त ऊर्ध्वश्वास[2]स्तथैव[3] च।
छर्द्यती सारमोहाश्च क्लमो मूर्च्छा भ्रमस्तथा।। 7.6।।

शिरः शूलञ्च[4] हल्लासो हिक्किका[5] जृम्भिकास्तथा[6]।
हृत्पार्श्वपृष्ठशूलञ्च[7] वातरक्तं तथैव[8] च।। 7.7।।

तिमिरः स्वयथुः[9] कुष्ठं[10] ज्वरश्चापि[11] कदाचन[12]।
प्रमादजा भवन्त्येते विघ्नरूपाः[13] सुदारुणाः।। 7.8।।

इति धर्मपुत्रिकायां संहितायां[14] प्रमादजान्तरायो[15]
नाम सप्तमः[16] पटलः।।

---

1. प्रमादाद्यदि] B7, edN,C7; प्रमादाद्यति - C1
2. ऊर्ध्वश्वास] C1, edN,C7; ऊर्ध्वस्वास - B7
3. स्तथैव] C1, edN,C7; तथैव - B7
4. शूलञ्च] C1, edN; सूलञ्च - B7, C7
5. हिक्किका] C1, edN,C7; हिक्काक - B7
6. जृम्भिकास्तथा] B7, C1, edN; झंभिकास्तथा - C7
7. हृत्पार्श्वपृष्ठशूलञ्च] C1, edN,C7; हृत्पार्श्वे पृष्ठसूलञ्च - B7
8. वातरक्तं तथैव] C1, B7; वातरक्तस्तथैव - edN; वाताल (with correction mark) क्तस्थैव च - C7
9. स्वयथुः] B7, edN,C7; श्वयथुः - B7
10. कुष्ठं] C1, edN; कुष्ठ - B7; कुठं -C7
11. ज्वरश्चापि] B7, C1, edN; ज्वलश्चापि - C7
12. कदाचन] C1, edN,C7; कदाचि(ष्ठहह्द्गष्ह्लद्गद्बत्) - B7
13. विघ्नरूपाः] B7, edN; विघ्नरूपा - C1, C7
14. इति धर्मपुत्रिकायां संहितायां] edN; धर्मपुत्रिकायां - C1; धर्मपुत्रिकायां संहितायां - B7, C7
15. प्रमादजान्तरायो] C1, B7; प्रमादजान्तराया - edN; प्रमादजान्तरायां - C7
16 सप्तमः] C1, B7; सप्तम - edN; समाप्तमः - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अष्टमः पटलः

प्रातिभः श्रावणादर्शः[1] स्वादुगन्धानुवेदनाः[2]।
प्राप्तयोगस्य जायन्ते[3] षडेते[4] प्रातिभादयः[5]।। 8.1।।

विद्या काव्यं तथा शिल्पं वेदवाक्यानुसारिता।
वाग्मित्वञ्च कवित्वञ्च प्रातिभस्य हि लक्षणम्।। 8.2।।

श्रावणः[6] शृणुयाच्छब्दं[7] योजनानां शतादपि[8]।
सर्वशब्दविधिज्ञश्च[9] सर्वशब्दार्थतत्त्ववित्[10]।। 8.3।।

देवदानवगन्धवार्नृषींश्च[11] सपितॄंस्तथा[12]।
यक्षांश्चाप्सरसः[13] पश्येत्तदादर्शस्य लक्षणम्।। 8.4।।

1. श्रावणादर्शः] C1, edN,C7; श्रावणादर्श - B7
2. स्वादुगन्धानुवेदनाः] C1, स्वादगन्धानुवेदना - B7; चानुगन्धानिवेदनः - edN,C7 (another line - प्रातिभश्रावणादर्शस्पर्शगन्धरसादनाः has been mentioned in the bracket in edN)
3. जायन्ते] B7, edN,C7; जायते - B7
4. षडेते] B7, C1, edN; षडेदे - C7
5. प्रातिभादयः] C1, edN,C7; प्रातिभादय - B7
6. श्रावणः] C1, edN,C7; श्रवणं - B7
7. ϱणुयाच्छब्दं] B7, C1, edN; ϱणुयाच्छब्दः - C7
8. शतादपि] B7, edN,C7; सतादपि - C1
9. सर्वशब्दo] C1, edN,C7; सर्वसब्दo - B7
10. सर्वशब्दार्थतत्त्ववित्] C1, B7; सर्ववाक्यार्थतत्त्ववित्- edN,C7
11. देवदानवगन्धवार्नृषींश्च] C7; देवदानवगन्धवार्नृषीश्च - C1; देवदानवगन्धवार्नृशींश्च - B7; देवदानंवगन्धवार्नृषीश्च – edN
12. सपितॄंस्तथा] C1, B7; सपितृस्तथा - edN,C7
13. यक्षांश्चाप्सरसः] C1, edN; यक्षाश्चाप्सरसः - B7, C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दिव्यांश्च[1] पार्थिवांश्चैव[2] अन्तरीक्षगतांस्तथा[3]।
स्पर्शगन्धरासान्[4] वेत्ति तत्तेषामुपलक्षम्।। 8.5।।

तेषु या[5] शक्तिरुत्पन्ना तां[6] हि बुद्ध्या परित्यजेत्।
नित्यं ब्रह्मपरो युक्तः सोऽन्तरायैर्विमुच्यते[7]।। 8.6।।

इति धर्मपुत्रिकायां संहितायां[8] प्रतिभाद्यन्तरायो[9] नामाष्टमः[10] पटलः।।

---

1. दिव्यांश्च] emd; दिव्यञ्च - C1, B7, C7; दिव्याश्च – edN
2. पार्थिवांश्चैव] edN; पार्थिवञ्चैव - C1, B7; पाथिवञ्चैव -C7
3. अन्तरीक्षo] C1, B7, C7; अन्तरिक्षo – edN
4. स्पर्शगन्धरासान्] B7, C1, edN; स्पर्शगन्धरासा – C7
5. या] B7, C1, edN; जा (with correction mark) - C7
6. तां] C1, edN,C7; सा - B7
7. सोऽन्तरायैर्विमुच्यते] edN; सोऽन्तरायेविमुच्यते - C1; सोन्तरायैविमुच्यते - B7, C7
8. इति धर्मपुत्रिकायां संहितायां] edN, C7; धर्मपुत्रिकायां - C1; धर्मपुत्रिकायां सहितायां - B7
9. प्रतिभाद्यन्तरायो] C1; प्रतिभाद्यन्तराय - B7; प्रतिभाद्यन्तराया - edN,C7
10. नामाष्टमः] C1, C7; नामष्टमः - B7; नाम अष्टमः – edN

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नवमः पटलः

एते दोषाः प्रवर्त्तन्ते[1] अज्ञानी यस्तु युञ्जते।
तस्माज्ज्ञानपरो भूत्वा योगं युञ्जीत यत्नतः।। 9.1।।

सूक्ष्मान्तराये[2] सञ्जाते तत्रासक्तिं[3] त्यजेद्बुधः[4]।
कुतः[5] शरीरमुत्पन्नं कीदृग्वापि निरूपयेत्।। 9.2।।

पूर्वकर्मविपाकेन पिण्डः सङ्कल्पसम्भवः[6]।
मज्जास्थिस्नायुमांसासृक्सङ्घातं[7] चर्मणावृतम्[8]।। 9.3।।

लालासिङ्घाणमस्तिष्क[9]गूथमूत्रसमाकुलम्[10]।
दुर्गन्धिः[11] कृमिभिः[12] पूर्णं श्मशानावस्करैः[13] समम्।। 9.4।।

1. प्रवर्त्तन्ते] B7, C1, edN; प्रवत्तन्ते - C7
2. सूक्ष्मान्तराये] C1, edN,C7; शूक्ष्मान्तराये - B7
3. तत्रासक्तिं] edN; तत्राशक्तिं - C1, B7, C7
4. बुधः] C1, B7, C7; वुधः – edN
5. कुतः] B7, C1, edN; कुटड्डष्कुतश्चष्- C7
6. संकल्पसम्भवः] C1, edN,C7; संकल्पसम्भवम् - B7
7. मज्जास्थिस्नायुमांसासृक्सङ्घातं] edN,C7; मज्जास्थिस्नायुमांसासृक्सङ्घात - C1; मज्जास्थिस्नायुससशृक्सङ्घात - B7
8. चर्मणावृतम्] B7, C1, edN; चर्मणाव्दतं -C7
9. लालासिङ्घाणमस्तिष्क] C1, edN,C7; not readable - B7
10. oमूत्रo] C1, B7, C7; oमुत्रo – edN
11. दुर्गन्धिः] B7; दुर्गन्धि - C1, edN,C7
12. कृमिभिः] C1, edN; क्रिमिभिः - B7; किमिभिः - C7
13. श्मशानावस्करैः] B7, C1, edN; श्यशानावस्करैः - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अशुचि क्षणिकं तुच्छं निस्सारं निन्दितं[1] बुधैः।
जन्ममृत्युजराग्रस्तन्नानारोगसमन्वितम्[2] ।।9.5।।

शीतोष्णक्षुत्पिपासार्त्तं[3] दुःष्पूरं[4] दुःखदं घृणम्।
ममेदमीदृशं[5] रूपं कान्तादीनाञ्च तादृशम्[6]।।9.6।।

श्रियो[7] वित्तञ्च दुःसाध्यमस्थिरं[8] क्षयधर्मि च।
तत्र को रज्यते[9] प्राज्ञो योगाभ्यासी[10] श्रुतान्वितः ।।9.7।।

मूढो वापि रतिं कुर्याद्[11] दग्धो[12] वा रागवह्निना।
यत्तु[13] बाल्यन्धनं[14] लक्ष्मीरीदृशं[15] वा कलेवरम्[16]।।9.8।।

इदं षट्कौशिकं[17] पिण्डं बहिरात्मेति[18] भण्यते[19]।
एतद्[20] विकल्पयेद्यस्तु सोऽन्तरायान्[21] विजयति[22]।।9.9।।

---

1. निन्दितं] C1, edN,C7; निन्दित - B7
2. शीतोष्णक्षुत्पिपासार्त्तं] C1, edN,C7; शीतोष्णक्षुत्पिपासार्त्त - B7
3. दुःष्पूरं] C1, edN,C7; दुःस्पूरं - B7
4. ममेदमीदृशं] C1, edN,C7; ममेदमीरूश - B7
5. रूपं कान्तादीनाञ्च तादृशम्] C1, edN; not readable - B7; रूपं कत्तादीनाञ्च -C7
6. श्रियो] B7, C1, edN; श्रियं- C7
7. दुःसाध्यमस्थिरं] C1, B7, C7; दुःसाध्यमास्थिरं – edN
8. रज्यते] C1, edN,C7; राज्यतो - B7
9. योगाभ्यासी] C1, edN,C7; योगाभ्याशी - B7
10. श्रु तान्वितः] C1, B7, C7; गुणान्वितः – edN
11. रतिं कुर्याद्] edN; रति कुर्या - C1; . . . . द् (द्वद्वह्यह्यद्वठुद्) - B7; रतिं कुर्यात्- C7
12. दग्धो] B7, C1, edN; दुग्धो - C7
13. यत्तु] C1, edN,C7; ये तु - B7
14. बाल्यन्धनं] C1, C7; बालान्तनं - B7; बाल्य(ह्य)न्धनं – edN
15. लक्ष्मीरीदृशं] edN; लक्ष्मी ईदृशं - C1; लक्ष्मी ईदृशी - B7; लक्ष्मी इदृशं - C7
16. कलेवरम्] C1, edN,C7; कडेवरं - B7
17. षट्कौशिकं] C1, edN,C7; षट्कौषिकं - B7
18. बहिरात्मेति] B7, C1, edN; बहिरातेति - C7
19. भण्यते] B7, edN,C7; भरण्यते - C1
20. एतद्] C1, edN,C7; एते - B7
21. सोऽन्तरायान्] C1; सोन्तराया . - B7; सोऽन्तरात्मा - edN,C7
22. विजयति] C1; not readable - B7; विधीयते - edN,C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

स एव योगान्निःसङ्गः सर्वदोषैर्विवर्जितः।
विकल्परहितः शुद्धः[1] परमात्मा प्रकीर्त्तितः।।9.10।।

य एवं भावयेन्नित्यं सोऽन्तरायान्[2] विजेष्यति[3]।
तस्माद्विवर्जयेत्सङ्गं ज्ञानमेकं[4] समाश्रयेत्।।9.11।।

महासूक्ष्मान्तराये[5] हि समुत्पन्ने महाभये[6]।
प्रतीकारं प्रवक्ष्यामि यथा श्रेयांस्यवाप्नुयात्[7]।।9.12।।

ध्यात्वा हृत्पद्ममध्यस्थं[8] बिन्दुदेवं[9] स्वजीवितम्।
तस्योपरि सुधाधारामव्यवच्छिन्नसन्ततिम्[10]।।9.13।।

पतन्ती[11] घण्टिकादेशे विमानां[12] विचिन्तयेत्[13]।
तेनामृतरसेनात्मतृप्तिमुत्पादयेद्बुधः[14] ।।9.14।।

---

1. शुद्धः] C1, edN,C7; शुद्धं - B7
2. सोऽन्तरायान्] C1, edN; सोऽन्तरायं - B7; सोन्तराया - C7
3. विजेष्यति] B7, edN,C7; विजेष्यते - C1
4. ज्ञानमेकं] C1, edN,C7; ज्ञानमेक - B7
5. महासूक्ष्मान्तराये] B7, C1, edN; महासूक्ष्मान्तरायो - C7
6. महाभये] C1, B7, C7; महाभयं – edN
7. श्रेयांस्यवाप्नुयात्] edN; श्रेयास्यवाप्नुयात् - C1, C7; श्रेयवामवाप्नुयात् - B7
8. मध्यस्थं] C1, edN,C7; मध्येस्थं - B7
9. बिन्दुदेवं] C1, edN,C7; बिन्दुं देवं - B7
10. सुधाधारामव्यवच्छिन्नसन्ततिम्] edN; सुधाधारामव्यवच्छिन्नसन्तितम् - C1; सुधाधारामध्यव्यवच्छिन्नसन्तितिं (सन्ततिं -post correction) - B7; सुधाधारामव्यवच्छिन्नसन्तति - C7
11. पतन्ती] B7, C1, edN; पतन्तीं – C7
12. विमानां] edN; श्रवमानां – C1, B7, C7
13. विचिन्तयेत्] C1, edN,C7; विचिन्तये - B7
14. oरसेनात्मतृप्तिo] C1, edN; oरसेनात्मातृप्तिo - B7; oरसेनोत्मा तृप्तिo - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

जपेन्मृत्युञ्जयं मन्त्रं दशलक्षं[1] दशाक्षरम्[2]।
नेत्रबीजेन[3] मन्त्रेण त्र्यक्षरेण समन्वितम्।। 9.15।।

अथवा सम्पुटं[4] कृत्वा नवतत्त्वेषु[5] योगवित्।
एकाशीतिपदं[6] योगं कुयार्देकाग्रबुद्धिना[7]।। 9.16।।

रसायनोपयोगञ्च[8] दानं[9] सर्वस्वमेव च।
आम्रपल्लवदूर्वाद्यैर्लक्षहोमञ्च[10] कारयेत्।। 9.17।।

भयं तत्र न गृह्णीयात् प्रीतिश्चैव[11] तथैव च।
योगाभ्यासं तदा[12] योगी यथाशक्त्या[13] विवर्धयेत्।। 9.18।।

अन्तरायेषु जातेषु नित्याभ्यासो जयः स्मृतः।
अप्रमादी सदा योगी न दोषं प्राप्नुयात्[14] क्वचित्[15]।। 9.19।।

इति धर्मपुत्रिकायां संहितायां[16] जयो नाम[17] नवमः पटलः[18]।।

---

1. दशलक्षं] C1, edN,C7; दशलक्ष - B7
2. दशाक्षरम्] C1; दशा . . - B7; दशाक्षरं - edN,C7
3. नेत्रबीजेन] C1, edN,C7; नेत्री बीजेन - B7
4. सम्पुटं] B7, C1, edN; संपुतं (with correction mark) – C7
5. नवतत्त्वेषु] C1, edN,C7; न च तत्तेषु - B7
6. oपदं] B7, edN,C7; oपद - C1
7. कुयार्देकाग्रबुद्धिना] B7, edN,C7; कुर्यमेकाग्रबुद्धिभिः - C1
8. रसायनोपयोगञ्च] B7, C1, edN; रसायनोपसोगञ्च - C7
9. दानं] C1, B7, C7; यूने – edN
10. oहोमञ्च] C1, edN,C7; o. मञ्च - B7
11. प्रीतिश्चैव] C1; प्रीति चापि - B7; प्रीतिं वापि - edN; प्रीतिस्वापि - C7
12. तदा] C1, edN,C7; सदा - B7
13. यथाशक्त्या] C1, B7, C7; यथा शक्ति – edN
14. प्राप्नुयात्] B7, C1, edN; प्राप्नुयात -C7
15. क्वचित्] C1, edN,C7; क्वि(श्oह्याह्ह correction क्व)ति . (not readable) - B7
16. इति धर्मपुत्रिकायां संहितायां] edN; धर्मपुत्रिकायां - C1; धर्मपुत्रिकायां संहितायां - B7, C7
17. जयो नाम] B7, edN,C7; शम? - C1
18. नवमः पटलः] B7, C1, edN; पटलः ।9।। – C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दशमः पटलः

प्रमादी युञ्जते यस्तु वातादिस्तस्य जायते।
तद्दोषस्य चिकित्सार्थं गतिं वायोर्निरूपयेत्[1] ।। 10.1 ।।

वायोरुर्ध्वं प्रवृत्तस्य[2] गतिं ज्ञात्वा प्रयत्नतः।
कुर्याच्चिकित्सां[3] दोषस्य द्रुतं योगी विचक्षणः ।। 10.2 ।।

तलपादनाभिदेशं[4] वातस्थानमुदीरितम्।
आनाभेर्हृदयं[5] यावत्[6] पित्तकोष्ठं प्रकीर्त्तितम् ।। 10.3 ।।

हृद्देशादूर्ध्वकायस्तु[7] श्लेष्मालयस्तथोच्यते[8]।
इति त्रयाणां[9] धातूनां स्वं[10] स्वं स्थानमुदाहृतम्[11] ।। 10.4 ।।

प्रमादाद्योगिना[12] वायुरुन्मार्गेण प्रवर्त्तितः।
यथामार्गमनासाद्य[13] ग्रन्थिभूत्वावतिष्ठते[14] ।। 10.5 ।।

---

1. वायोर्निरूपयेत्] edN; वायोनिरूपयेत् - C1, B7, C7
2. वायोरूर्ध्वं प्रवृत्तस्य] C1, B7, C7; वायोरुर्ध्वप्रवृत्तस्य - edN
3. कुर्याच्चिकित्सां] C1, B7; कुर्याच्चिकित्सा - edN,C7
4. तलपादo] C1, B7; तलपादा - edN; तलपादादा - C7
5. आनाभेर्हृदयं] edN; आनाभेहृदयं - C1, B7; आनाभेर्हृदया - C7
6. यावत्] C1, B7, C7; ह्यावत् – edN
7. हृद्देशादूर्ध्वकायस्तु] C1, B7; हृद्देशादूर्ध्वकोष्ठन्तु - edN; हृद्देशादूर्ध्वकोष्ठस्तु - C7
8. श्लेष्मालयस्तथोच्यते] emd; श्लेष्मालयमथैच्यते - C1; श्लेष्मालय तथोच्यते - B7; श्लेष्मालयमथोच्यते - edN,C7
9. त्रयाणां] C1, edN,C7; त्रयानां - B7
10. स्वं] C1, edN,C×; स्व - B7
11. स्थानमुदाहृतम्] emd; स्थानमुदीरितम् - C1; स्थानमुदाहृत - B7; स्थानमुदाहृतं - edN,C7
12. प्रमादाद्योगिना] C1, edN,C7; प्रमादाद्योगिनां - B7
13. यथामार्गमनासाद्य] C1, B7; यदा मार्गमनासाद्य - edN,C7
14. ग्रन्थिभूत्वावतिष्ठते] C1, edN; ग्रन्थिभूत्वावतिष्ठिते - B7; ग्रन्थिभूवतिष्ठत - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

तदा नानाविधा रोगा जायन्ते[1] विघ्नकारकाः।
तेषां चिकित्सां वक्ष्यामि यदुक्तं[2] तत्त्वदर्शिभिः।। 10.6।।

उन्मार्गप्रस्थितो[3] वायुः पित्तकोष्ठे यदा स्थितः[4]।
हृच्छूलं पार्श्वशूलं वा पृष्ठशूलञ्च जायते[5]।। 10.7।।

तैलाभ्यङ्गं[6] तदा पथ्यं स्नानं चोष्णेन वारिणा[7]।
सघृतं पायसं[8] भुक्त्वा जीर्णान्ते[9] योगमारभेत्[10]।। 10.8।।

यस्मिन्यस्मिन्[11] समुद्देशे[12] रुजा बाधः[13] प्रवर्त्तते [14]।
तस्मिन् देहे[15] स्थितं वायुं मनसा परिचिन्तयेत्।। 10.9।।

एकचित्तेन तद्ध्यात्वा[16] पूरयेत्पूरकेण[17] तु।
निःशेषं[18] रेचकं कुर्याद् यथाशक्त्या[19] प्रयत्नतः।। 10.10।।

---

1. जायन्ते] B7, C1, edN; जयन्ते - C7
2. यदुक्तं] C1, edN,C7; यदुाक्त -B7
3. उन्मार्गप्रस्थितो] C1, B7; उन्मार्गं प्रस्थितो - edN,C7
4. स्थितः] C1, edN,C7; स्थिताः(श्रo ह्यह्ह correction - स्थितः) - B7
5. जायते] B7, C1, edN; यायते - C7
6. तैलाभ्यङ्गं] edN,C7; तेलाभ्यङ्गं - C1; तेलाभ्यङ्ग - B7
7. वारिणा] B7, C1, edN; वारिना - C7
8. पायसं] B7, edN,C7; पायशं - C1
9. जीर्णान्ते] C1, B7, C7; जीणार्यु – edN
10. योगमारभेत्] B7, C1, edN; योगमाल(with correction mark)भेत् – 7
11. यस्मिन्यस्मिन्] C1, edN,C7; यस्मिं यस्मिं - B7
12. समुद्देशे] C1, edN; समुदेश्ये - B7; समुद्येश - C7
13. बाधः] C1, B7; बाधा - edN; बाध - C7
14. प्रवर्त्तते] C1, edN,C7; प्रवर्त्ततेः -B7
15. देहे] C1, B7; देशे - edN,C7
16. तद्ध्यात्वा] C1(not readable), B7; तं ध्यात्वा - edN,C7
17. पूरयेत्पूरकेण] C1, edN; पूरयेत्पूरकेन - B7, C7
18. निःशेषं] C1, edN,C7; निःशेष - B7
19. यथाशक्त्या] C7; यथाशक्या - C1, B7; यथाशक्ति - edN

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

बहुधा रेचकं कृत्वा पूरयित्वा पुनः पुनः।
कर्षयेत् प्राक्स्थितं[1] वायुं कर्णतोयमिवाम्बुना[2]।। 10.11।।

सप्राणं[3] स्निग्धमाहारं तदा भुञ्जीत[4] योगवित्।
एवं शूलादयो रोगाः[5] शाम्यन्ते वातपित्तजाः।। 10.12।।

कफकोष्ठे यदा वायुर्ग्रन्थिभूत्वावतिष्ठते[6]।
ह्वल्लासहिक्किकाश्वासशिरःशूलादयो[7] रुजाः।। 10.13।।

जायन्ते धातुवैषम्यात्तदा[8] कुर्यात् प्रतिक्रियाम्[9]।
सम्यग्भोजनमादायापः स्पृश्य[10] तदनन्तरम्।। 10.14।।

कुम्भकं धारणं[11] कुर्याद्द्विवित्रिवारं विचक्षणः[12]।
एवं श्वासादयो रोगाः[13] शाम्यन्ते[14] कफवातजाः।। 10.15।।

---

1. प्राक्स्थितं] C1, B7; प्रोत्थितं - edN; प्रोस्थितं - C7
2. कर्णतोयमिवाम्बुना] C1, edN,C7; कर्णतोयविवांवुना - B7
3. सप्राणं] C1, edN,C7; सप्राण - B7
4. भुञ्जीत] C1, edN; भुजीत - B7; भूञ्जीत - C7
5. रोगाः] C1, edN,C7; रोगा - B7
6. वार्यु] C1, edN,C7; वायु - B7
7. ह्वल्लासहिक्किकाश्वासo] C1; ह्वल्लासहिक्किकास्वासo - B7; हल्लासहिक्किकाश्वासo - edN; ह्वल्लासहिक्किकास्वासo - C7
8. धातुवैषम्यात्] edN; धातुवैशम्यात् - C1, B7; धातुवैसम्यात् - C7
9. प्रतिक्रियाम्] C1, edN,C7; यतिक्रियाम् - B7
10. सम्यग्भोजनमादायापः स्पृश्य] edN; सम्यग्भोजनमादायाप स्पृश्य - C1; सम्यग्भोजनमा . . प स्पृस्य - B7; सम्यग्भोजनमादायोपस्पृश्च - C7
11. धारणं] B7, C1, edN; धारनं - C7
12. विचक्षणः] edN,C7; विचक्षण - C1, B7
13. श्वासादयो रोगाः] C1, edN; स्वासादयो रोगा - B7; स्वासादयो रोगाः - C7
14. शाम्यन्ते] B7, C1, edN; साम्यन्ते - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

भुक्त्वा तु पायसं सोष्णं क्षीरं वापि घृतप्लुतम्[2]।
वारुणीं[2] धारणा[3] ध्यात्वा कुर्यात् सर्वाङ्गयन्त्रितम[4]।। 10.16।।

एवं कुष्ठादयो रोगाः प्रणश्यन्ति न संशयः[5]।
नेत्रे सम्मील्य[6] कुर्वीत तिमिरादि प्रशाम्यति[7]।। 10.17।।

स्वयथुर्वातरक्तं[8] वा योगिनो जायते सदा[9]।
यत्र यत्र रुजा वाधस्तत्र[10] वायुं[11] विचन्तयेत्।। 10.18।।

पूरयित्वा ततः सम्यक् पूरकेन[12] विचक्षणः।
धारयित्वा यथाशक्त्या[13] नाडीयोगेन निश्चलम्।। 10.19।।

संकुत्वा[14] कर्षयेद्भूयः[15] कूर्मवद्रेचकेन तु।
चक्रवद्भामयेद्वापि पूरयित्वा पुनः पुनः।। 10.20।।

---

1. घृतप्लुतम्] emd; घृतप्लुतं - B7, edN,C7; घृतप्लुतः - C1
2. वारुणीं] C1, edN,C7; वारुणं - B7
3. धारणां] C1, edN,C7; धारणं - B7
4. सर्वाङ्गयन्त्रितम्] C1; सवाङ्गयन्त्रितं - B7; सर्वाङ्गपाचितम् - edN; सर्वाङ्गपत्रितं - C7
5. एवं कुष्ठादयो रोगाः प्रणश्यन्ति न संशयः] C1, edN; एवं कुष्ठा . . . . . न्ति न सशयः (not readable) - B7; एवं कुष्ठादयो रोगाः प्रणस्यन्ति न संशयः - C7
6. सम्मील्य] edN; संमील - C1; संयंमील्यं - B7; समील्य - C7
7. प्रशाम्यति] C1, edN,C7; प्राशाम्यति - B7
8. स्वयथुर्वातरक्तं] edN; श्वयथुर्वातरक्तं - C1; स्वयथं वातरक्तं - B7; स्वपथं वातरक्तं वा - C7
9. सदा] C1; यदा - B7,C7; तदा – edN
10. वाधस्तत्र] C1, B7; वाधा तत्र - edN; बाधां तत्र - C7
11. वायुं] C1, edN,C7; वायु - B7
12. पूरकेन] C1, B7; रेचयित्वा - edN; पूरयित्वा - C7
13. यथाशक्त्या] C1, C7; यथाशक्ता? - B7; यथाशक्ति – edN
14. संकुत्वा] C1; संकुर्यात् - edN,C7; सं . . (not readable) - B7
15. कर्षयेद्भूयः] C1, edN,C7; not readable - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

उत्तानोऽथ समे देशे ततः कृत्वा तु विग्रहम्[1]।
प्राणायामं प्रकुर्वीत[2] सर्वदोषप्रशान्तये।। 10.21।।

वैद्यशास्त्रोक्तविधिना क्रियां कुर्वीत[3] यत्नतः।
कुर्याद्योगचिकित्साञ्च शीघ्रमेव[4] प्रशाम्यति।। 10.22।।

संक्षेपतश्चिकित्सान्तु[5] सर्वरोगेषु[6] योगवित्।
यत्र यत्र रुजाबाधस्तन्देशं[7] व्याप्य धारयेत्।। 10.23।।

प्रातिभाद्यन्तरायेषु[8] समुत्पन्नेषु योगवित्।
यथाशक्त्या[9] प्रयत्नेन योगाभ्यासं विवर्धयेत्[10]।। 10.24।।

इति धर्मपुत्रिकायां संहितायां[11] चिकित्सा नाम दशमः पटलः।।

---

1. विग्रहम्] C1; विग्रहः - B7; विग्रहं - edN,C7
2. प्रकुर्वीत] C1, edN,C7; प्रकुवीत - B7
3. कुर्वीत] C1, edN,C7; कुवित - B7
4. शीघ्रमेव] B7, C1, edN; शीघ्रमेवं - C7
5. संक्षेपतश्चिकित्सान्तु] edN,C7; संक्षेपतश्चिकित्साञ्च - C1; संक्षेपतश्चिकित्सां तु - B7
6. सर्वरोगेषु] C1, edN; सवरोगेषु - B7; सर्वलो(with correction mark)गेषु -C7
7. रुजाबाधस्तन्देशं] emd; रुजाबाधस्तन्देश - C1; भुजाबाधस्तन्देशं - B7; रुजा बाधा तं देशं - edN; रुजाबाधस्तं देशं – C7
8. प्रातिभाo] C1, edN,C7; प्रतिभाo - B7
9. यथाशक्त्या] C1, C7; यथाशक्ता - B7; यथाशक्ति – edN
10. योगाभ्यासं विवर्धयेत्] B7; edN,C7; योगाभ्यासाद्विद्धयेत् - C1
11. इति धर्मपुत्रिकायां संहितायां] edN; धर्मपुत्रिकायां - C1; धर्मपुत्रिकायां सहितायां - B7, C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

एकादशः पटलः

ताभ्यां विजीयते[1] योगी यदा विघ्नचतुष्टयम्।
तदा सञ्जायते देहे प्रवृत्तिः सिद्धिसूचिका[2]।। 11.1।।

युञ्जन्योगी यदा स्पर्शमपूर्वम् उपजायते[3]।
स्वकीयदेहे कस्मिंश्चित्तदा[4] तमुपलक्षयेत्।। 11.2।।

पिपीलिकागतिस्पर्श[5] जिह्वास्यन्दितमेव वा[6]।
विषाग्निकण्टकैस्तुल्यमन्यच्च[7] सुखलक्षणम्।। 11.3।।

योगाग्निं तं[8] विजानीयाज्जातां[9] पापप्रणाशनम्[10]।
प्रवृत्तिः सैव[11] विख्याता योगसंसिद्धिसूचिका[12]।। 11.4।।

1. विजीयते] C1, B7, C7; विजयते – edN
2. सिद्धिसूचिका] C1, edN; सिद्धसूचकाः - B7; सिद्धिसूचका - C7
3. उपजायते] C1, B7, C7; लभते स्वयं – edN
4. कस्मिंश्चित्तदा] B7, C1, edN; कस्मिंश्चि तदा - C7
5. पिपीलिकागतिस्पर्शं] emd; पिपीलकागतिस्पर्श - C1; पिपीलिकागतिं स्पर्शं - B7; पिपीलिकागतिस्पर्शो - edN,C7
6. जिह्वास्यन्दितमेव वा] B7, C7; जिह्वास्यन्दितमेव च - C1; जिह्वास्यन्दितमेष वा – edN
7. oकण्टकै स्तुल्यमन्यच्च] C1, edN; oकण्टके स्तुल्यमन्यच्च - B7; oकण्ठकैस्तुल्यमण्य(with correction mark)च्च - C7
8. योगाग्निं तं] C1, edN,C7; योगाग्नि तं - B7
9. विजानीयाज्जातां] B7; ... विज्ञातं (missing letters) - C1; विजानीयाज् ज्ञातं - edN,C7
10. पापप्रणाशनम्] C1, B7; पापप्रणाशनी - edN; पापप्रणासनं - C7
11. सैव] C1, edN; शैव - B7; सौव -C7
12. योगसंसिद्धिसूचिका] C1, edN,C7; यो. . (some correction, not clear) सिद्धिसूचकाः - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नानाशब्दरसस्पर्शरूपगन्धा[1] अमानुषाः।
युञ्जता योगिना साक्षात्[2] प्रायेणैवोपलक्षयेत्[3]।। 11.5।।

प्रवृत्तौ वर्धमानायामकाण्डो[4] योगिनस्तदा[5]।
मनोज्ञः श्रुयते शब्दो देवदुन्दुभिनिस्वनः[6]।। 11.6।।

किमप्यास्वाद्यते[7] वक्त्रे रसः[8] चैवामृतोपमम्[9]।
गात्रस्याह्लादनकरः सुखस्पर्शोऽनुभूयते[10]।। 11.7।।

अव्यक्तरूपमाकाशे[11] दृश्यते मेघवेष्टितम्।
पारिजातादिपुष्पाणां[12] गन्धश्च[13] जायते तदा।। 11.8।।

आसां[14] योगप्रवृत्तीनां यदि कापि प्रवर्त्तते।
प्रवृत्तयोगं तं प्राहुं[15]योगिन्यो योगचिन्तकाः।। 11.9।।

---

1. oरसस्पर्शरूपगन्धा] edN,C7; oरशस्पर्शरूपगन्ध - C1; oरशस्पर्शरूपगन्धा - B7
2. साक्षात्] C1, edN,C7; शाख्यात् - B7
3. प्रायेणैवोपलक्षयेत्] B7; प्रायेणैवोपलक्ष्यते - C1; प्रायेणैवोपलक्षिताः - edN; प्रायेनैवोपलक्षते - C7
4. oमकाण्डो] C1; o. . (ह्मoद्वद्म correction, ठ्ठoह्ल ष्द्यद्वड्डह्व)मण्डे - B7; oमकाण्डे - edN,C7
5. तदा] C1, edN,C7; तथा - B7
6. देवदुन्दुभिनिस्वनः] C1, B7; देवदुन्दुभिनिस्वतः - edN; देवदुन्दुभिनिःस्वनः - C7
7. किमप्यास्वाद्यते] B7, edN,C7; किमन्यास्वाद्यते - C1
8. वक्त्रे रसः] C1, edN; वक्त्रे रसं - B7; वक्त्रै रासं - C7
9. चैवामृतोपमम्] C1; चेवामृतोपमं - B7, C7; चैवामृतोपमः - edN
10. सुखस्पर्शोo] C1, edN; शुखस्पर्शोo - B7; सुखस्पशोo - C7
11. oरूपमाकाशे] B7, edN,C7; oरूपकाशे - C1
12. oपुष्पाणां] B7, C1, edN; oपुष्पानां - C7
13. गन्धश्च] C1; गन्धं वा - B7, C7; गन्धो वा - edN
14. आसां] C1, edN,C7; आसा - B7
15. तं प्राहुं] C1, edN; त प्राह - B7; प्राहु - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पञ्च प्रत्ययलिङ्गानि क्षीणदोषस्य योगिनः।
एतानि तु चलानीति कीर्त्तितानि मनीषिभिः[1] ।। 11.10 ।।

इति धर्मपुत्रिकायां संहितायां[2] चललिङ्गो[3] नामैकादशः[4] पटलः ।।

---

1. मनीषिभिः] C1, edN,C7; मिनीषिभिः - B7
2. इति धर्मपुत्रिकायां संहितायां] emd; धर्मपुत्रिकायां (ऽछुद्ध) not readable - C1; धर्मपुत्रिकायां सहितायां - B7, C7; इति धर्मपुत्रिकायां सहितायां – edN
3. चललिङ्गो] edN,C7; चललिङ्ग - C1; . . लिङ्गो - B7
4. नामैकादशः] B7, edN,C7; नाम एकादशमः - C1

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

द्वादशः पटलः

आत्मानं पृथिवीं वापि[1] ज्वलन्तं यदि पश्यति[2]।
मध्याह्ने शशिनो[3] विम्बं तारारूपाणि वा यदि[4]।। 12.1।।

भूतान्याविशमानानि[5] स्वदेहं[6] पश्यतेऽथवा।
युञ्जत्कदाचित्संन्यासी[7] निःसंज्ञ[8] इव जायते।। 12.2।।

आरोग्यं लघुदेहत्वं त्वक्स्निग्धशुभवर्णता[9]।
मनोज्ञा भाषिता[10] प्रज्ञा सुगन्धिमुखगात्रता[11]।। 12.3।।

---

1. वापि] C1, edN,C7; चापि - B7
2. पश्यति] C1, edN,C7; पस्यति - B7
3. शशिनो] C1, edN,C7; शसिनो - B7
4. यदि] C1; दिवा - B7, edN,C7
5. भूतान्याविशमानानि] C1, C7; भूतान्याविषमानानि - B7; भूतान्याधिसमानानि – edN
6. स्वदेहं] C1, B7, C7; स्वदेहे – edN
7. युञ्जत्कदाचित्संन्यासी] C1, C7, युञ्जत्कदावित्सन्यासी - B7; Line missing – edN
8. निःसंज्ञ] B7, C1, edN; निःसंज्ञा -C7
9. त्वक्स्निग्धशुभवर्णता] C1; त्वस्निग्धशुभवर्णितः - B7; Line missing - edN; त्वाक्स्निग्धं शुभवर्णता -C7
10. मनोज्ञा भाषिता] C1; मनोज्ञभाषिता - B7, C7; Line missing – edN
11. सुगन्धि०] C1; सुगन्ध० - B7, C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

उपेक्षा वीततृष्णात्वं[1] समर्थेन्द्रियता[2] च यत्।
कीर्त्तितानि ध्रुवाणीति[3] लिङ्गान्येतानि[4] पण्डितैः[5] ।। 12.4 ।।

इति धर्मपुत्रिकायां संहितायां[6] ध्रुवलिङ्गं[7] नाम द्वादशः[8] पटलः ।।

---

1. वीततृष्णात्वं] - C7; वीतृसत्वं - C1; वीततृपत्वं - B7; Line missing - edN
2. समर्थेन्द्रियता] B7, C7; सर्वके?न्द्रियता - C1; Line missing – edN
3. ध्रुवाणीति] edN; ध्रुवाणनीति - C1, B7, C7
4. लिङ्गान्येतानि] C1, edN,C7; लिङ्गानेतानि - B7
5. पण्डितैः] C1, B7, C7; योगिभिः – edN
6. इति धर्मपुत्रिकायां संहितायां] edN; धर्मपुत्रिकायां - C1; धर्मपुत्रिकायां सहितायां - B7, C7
7. ध्रुवलिङ्गं] C1, B7, C7; ध्रुवलिङ्गो – edN
8. द्वादशः] edN; द्वादशमः - C1, B7, C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

त्रयोदशः पटलः

कञ्चिदुत्पाद्य[1] योगाग्निं सूक्ष्ममप्युपलक्षितम्।
योगेन सततभ्यासाद् अनिर्विण्णो[2] विवर्धयेत्।। 13.1।।

धूमपूर्वो यथा ह्यग्निर्मथ्यमानः[3] प्रजायते।
योगाग्निर्[4]योगिनस्तद्वत् स्पर्शपूर्वः[5] प्रजायते।। 13.2।।

जनयित्वा यथा ह्यग्निः सूक्ष्मो यत्नेन दीपयेत्[6]।
उत्पाद्य योगी योगाग्निं[7] तथा[8] दीप्तं विवर्धयेत्[9]।। 13.3।।

तृणकाष्ठेन्धनैः सोऽग्निर्[10] यथा दीप्तो विवर्धयेत्[11]।
षडङ्गादीन्धनैस्तद्वद्योगाग्निरपि[12] वर्धयेत्[13]।। 13.4।।

---

1. कञ्चिदुत्पाद्य] C1; कंचिदुपाद - B7; कश्चिदुत्पाद्य - edN,C7
2. अनिर्विण्णो]edN; अनिर्विन्नो - C1, C7; अनिवि . (ण्णो - conj.) - B7
3. ह्यग्निर्मथ्यमानः] C1, edN,C7; ह्यग्निमथ्यमानाः(post correction - नः) - B7
4. योगाग्निर्] C1, edN,C7; योगाग्नि - B7
5. स्पर्शपूर्वः] edN; स्पर्शपूर्वं - C1; स्पर्शपूर्व - B7; स्पर्शपूर्वे - C7
6. दीपयेत्] B7, C7; दीयते - C1; दीप्यते – edN
7. योगाग्निं] B7, C1, edN; योगाग्नि - C7
8. तथा] edN; यथा - C1, C7; यदा - B7
9. विवर्धयेत्] B7, C1, edN; विवर्धयेत - C7
11. सोऽग्निर्] C1, edN,C7; सोऽग्नि - B7
12. विवर्धयेत्] C1; विवर्धयेय - B7; विवर्द्धते - edN; विवर्द्धयेत - C7
13. षडङ्गादीन्धनैस्तद्वद्योगाग्निरपि] B7, C1, edN; षडङ्गादीन्धनैस्तद्वत् योगाग्निरपि - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

प्रदीप्तस्तु[1] यथैवाग्निः क्रमात्[2] क्षपयतीन्धनम्[3]।
योगाग्निस्तद्वदादीप्तो दहेत्पापं[4] पुरातनम्[5]।। 13.5।।

एवं योगाग्निना पापं क्षपयित्वा पुरातनम्।
पश्चात्फलं लभेद्योगी वृद्ध्युपाय इति स्मृतः[6]।। 13.6।।

इति धर्मपुत्रिकायां संहितायां[7] वृद्ध्युपायो नाम त्रयोदशः[8] पटलः।।

---

1. वर्धयेत्] B7; वर्द्धते - edN; Line missing - C1; वर्द्धयेत् - C7
2. प्रदीप्तस्तु] B7, C1, edN; प्रदीप्तैस्तु - C7
3. क्रमात्] C1; क्षणात् - B7, edN,C7
4. क्षपयतीन्धनम्] C1; क्षपयन्तीन्धनं - B7; क्षपयतीन्धनं - edN,C7
5. दहेत्पापं] C1, C7; दहेत्पाप - B7; Line missing – edN
6. पुरातनम्] C1; पुरातन - B7; Line missing - edN; पुरातनं - C7
7. स्मृतः] B7, C1, edN; स्मृताः - C7
8. इति धर्मपुत्रिकायां संहितायां] edN; धर्मपुत्रिकायां - C1; धर्मपुत्रिकायां सहितायां - B7; धर्मपुत्रिकायां संहितायां - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

चतुर्दशः पटलः

दृष्ट्वा प्रत्ययलिङ्गानि सिद्धिसंसूचकानि[1] वै।
योगिनो जायते हर्षो मनस्तुष्टिश्च वर्धते[2]।। 14.1।।

अतिहर्षेण वा योगी परेभ्यः कथयेद्यदि।
सिद्धिर्ममेति वा मत्वा योगाभ्यासं[3] परित्यजेत्।। 14.2।।

अथवा ज्ञानदातारं गुरुं[4] निन्दति[5] दुर्मतिः।
सा प्रवृत्तिर्विमूढापि[6] त्रिभिरेतैर्विनश्यति[7]।। 14.3।।

इति धर्मपुत्रिकायां संहितायां[8] विनाशो[9] नाम[10] चतुर्दशः[11] पटलः।।

---

1. त्रयोदशः] edN; त्रयोदशमः - C1, B7, C7
2. संसूचकानि] C1, edN,C7; संशूचिकानि - B7
3. वर्धते] B7, edN; . र्धते - C1; वर्द्धते - C7
4. योगाभ्यासं] C1, edN,C7; योगाभ्यास - B7
5. गुरुं] C1, edN,C7; गुरु - B7
6. निन्दति] B7, C1, edN; निन्दन्ति - C7
7. प्रवृत्तिर्विमूढापि] C1; प्रवृत्तिविरूढापि - B7; प्रवृत्तिर्विरूढापि - edN,C7
8. विनश्यति] C1; विनस्यते - B7; विनस्यति - edN; विनश्यते - C7
9. इति धर्मपुत्रिकायां संहितायां] edN; धर्मपुत्रिकायां - C1; धर्मपुत्रिकायां सहितायां - B7, C7
10. विनाशो नाम] edN; विनाश - C1; . . . . . (letters missing) - B7, C7
11. चतुर्दशः] edN,B7; चतुर्दशमः - C1, C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पञ्चदशः पटलः

यदा प्रवृत्तिरुत्पन्ना वर्धितापि विनश्यति[1]।
उपायैस्त्रिभिरेवान्यैः प्रत्यानेया[2] पुनस्तदा[3]।। 15.1।।

नदीकूलेऽथवारण्ये प्रच्छन्ने शून्यवेश्मनि[4]।
निःशब्दे निर्जने शान्ते योगं युञ्जेद्[5] विचक्षणः।। 15.2।।

भावयित्वा यथाशक्त्या[6] सिद्ध्युपायेषु योगवित्।
पादाङ्गुष्ठे मनः कृत्वा शनैः प्राणान्[7] विधारयेत्।। 15.3।।

तावद् विधारयेत्[8] प्राणान्[9] यावत्स्पर्शो[10] न लभ्यते[11]।
तत्स्पर्शं प्रेरयेदूर्ध्वं नादमुच्चार्य[12] यत्नतः।। 15.4।।

---

1. विनश्यति] C1, edN; विनश्यते - B7, C7
2. प्रत्यानेया] edN,C7; प्रत्यानेयाः - C1, B7
3. पुनस्तदा] B7, edN,C7; पुनस्तथा - C1
4. शून्यवेश्मनि] edN,C7; शून्यवेश्मनिः - C1; शून्यवेश्मन - B7
5. युञ्जेद्] C1, B7; युञ्जाद् - edN; युंक्ताद् - C7
6. यथाशक्त्या] C1, C7; यथाशक्ता - B7; यथाशक्ति – edN
7. प्राणान्] C1, edN,C7; प्राणा - B7
8. विधारयेत्] C1, edN,C7; विधारये - B7
9. प्राणान्] C1, edN,C7; प्राणा - B7
10. स्पर्शो] C1, edN,C7; स्पर्शं - B7
11. लभ्यते] B7, edN,C7; . भ्यते - C1
12. नादमुच्चार्य] C1, edN,C7; नादमुचार्य - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अथवा दन्तयोः सन्धौ[1] जिह्वाग्रे[2] न्यस्य तन्मतिः।
प्राणायामं प्रकुर्वीत[3] यावत्स्पर्शो न जायते।। 15.5।।

जिह्वाग्रेण हि योगाग्नेः[4] स्पर्श[5] योगी सदा लभेत्।
तदूर्ध्वं प्रेरयेच्छीघ्रं तत्स्पर्श[6] पूर्ववद्बुधः[7]।। 15.6।।

तालुमध्येऽथवा योगी मनः कृत्वा विधारयेत्[8]।
जातप्रवृत्तौ तत्स्पर्श[9] तथैव पुनरुद्धरेत्।। 15.7।।

यस्मिन्यस्मिन्[10] शरीरेषु[11] पूर्वजाताः[12] प्रवृत्तयः।
तस्मिन्तस्मिन्[13] मनः कृत्वा योगी प्राणान्[14] विधारयेत्।। 15.8।।

प्राणायामसमं[15] नास्ति योगिनां पापशोधनम्।
प्राणायामपरो[16] भूत्वा तस्माद्युञ्जीत योगवित्।।15.9।।

---

1. सन्धौ] C1, edN,C7; सन्धो - B7
2. जिह्वाग्रे] C1, B7; जिह्वाग्रं - edN,C7
3. प्रकुर्वीत] C1, edN,C7; प्रकुवीत - B7
4. हि योगाग्नेः] C1, B7; हतो योगी - edN,C7
5. स्पर्शं] C1, edN; स्पर्श - B7, C7
6. तत्स्पर्शं] C1, edN; तत्स्पर्श - B7; तत्पर्श - C7
7. पूर्ववद्बुधः] B7, edN,C7; पूरयेदबुधः - C1
8. कृत्वा विधारयेत्] C1, edN,C7; कृत्वापि धारयेत् - B7
9. तत्स्पर्शं] edN,C1 (not readable), C7; तत्स्पर्श - B7
10. यस्मिन्यस्मिन्] C1; यस्मिं यस्मिं - B7; यस्मिन् यस्मिन् - edN; यस्मिन्यस्मिन - C7
11. शरीरेषु] B7, edN; शरीरे तु - C1; शरी . . - C7
12. पूर्वजाताः] C1, B7; पूर्वं जाताः - edN,C7
13. तस्मिन्तस्मिन्] C1, C7; तस्मिं तस्मिं - B7; तस्मिंस्तस्मिन् – edN
14. प्राणान्] C1, edN,C7; प्राणां - B7
15. प्राणायामसमं] B7, edN,C7; प्राणायामं समं - C1
16. प्राणायामपरो] B7, C1, edN; प्राणायामरो - C7

CENTRE FOR SHAIVA STUDIES Puducherry

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

प्राणायामविशुद्धात्मा[1] सर्वपापैर्विमुच्यते[2]।
तदात्मज्योतिरमलमात्मन्येव प्रपश्यति[3]।। 15.10।।

मूर्ध्नि भागेऽथवा योगी योगादुत्कृष्य केवलम्।
मणौ सूत्रमिवासक्तं[4] पश्यत्यात्मानमात्मना[5]।। 15.11।।

शुद्धस्फटिकसंकाशं विमुक्तं सर्वबन्धनैः।
प्रत्यानयन इत्येष[6] योगविद्भिः प्रकीर्त्तितः[7]।। 15.12।।

इति धर्मपुत्रिकायां संहितायां[8] प्रत्यानयनो नाम[9] पञ्चदशः[10] पटलः।।

---

1. विशुद्धात्मा] C1, edN,C7; विशुत्मात्मा - B7
2. सर्वपापैं] C1, edN,C7; सर्वपापै – B7
3. प्रपश्यति] C1, edN,C7; प्रशस्यति - B7
4. सूत्रमिवासक्तं] edN,C7; सूत्रमिवाशक्तं - C1; शूत्रमिवासक्तं - B7
5. पश्यति] C1, edN,C7; पश्यन्ति – B7
6. प्रत्यानयन इत्येष] C1, B7; प्रत्यानयनमित्येतद् - edN; प्रत्यानयननित्येत - C7
7. प्रकीर्त्तितः] C1; प्रकीर्त्तित - B7; प्रकीर्त्तितं - edN; प्रकीर्तिताः - C7
8. इति धर्मपुत्रिकायां संहितायां] edN; धर्मपुत्रिकायां - C1; इति धर्मपुत्रिकायां सहितायां - B7; धर्मपुत्रिकायां संहितायां - C7
9. प्रत्यानयनो नाम] C1; प्रत्यानयन नाम - B7; प्रत्यानयनन्नाम - edN,C7
10. पञ्चदशः] edN; पञ्चदशमः - C1, C7; पञ्चमः - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

षोडशः पटलः

सिद्ध्युपायं[1] विदित्वादौ यः कर्म कुरुते नरः।
तस्य[2] हस्ततले[3] सिद्धि[4]र्वर्त्तते नात्र संशयः।। 16.1।।

स्थानासनविधानानि संस्थानकरणानि च।
व्याक्षेपजनकाः सर्वे नह्येते सिद्धिहेतवः[5]।। 16.2।।

सङ्गत्यागो मनःस्थैर्यं समाधिस्तत्त्वनिर्णयः[6]।
सिद्धिहेतुर्भवन्त्येते[7] शेषा व्याक्षेपकारकाः।। 16.3।।

सर्वसत्त्वेषु कारुण्यं वैराग्यं विषयेषु च।
आकिञ्चन्यञ्च सर्वत्र योगस्योपनिषत्परा[8]।। 16.4।।

दयावान्[9] सर्वभूतेषु विरक्तोऽकिञ्चनो मुनिः।
गुप्तशिश्नोदरो[10] योगी मनः शमयति क्षणात्[11]।। 16.5।।

1. सिद्ध्युपायं] B7, edN,C7; सिद्ध्युपाय - C1
2. तस्य] B7, C1, edN; तस्या - C7
3. हस्ततले] B7, edN,C7; हस्त . ले - C1
4. सिद्धि] C1, edN,C7; सिद्धि – B7
5. सिद्धिहेतवः] edN,C7; सिद्धितेतवः - C1; सिद्धिहेतव - B7
6. समाधिस्तत्त्वनिर्णयः] emd; समाधिस्तत्त्वनिर्णयम् - C1; समाधितत्त्वनिर्णयः - B7, edN,C7
7. भवन्त्येते] C1, edN,C7; भवत्येते - B7
8. योगस्योपनिषत्परा] edN,C7; योगस्योपनिषत्पराः - B7; ..... त्पराः(not readable) - C1
9. दयावान्] C1, edN; दयावां - B7; दयावात् - C7
10. गुप्तशिश्नोदरो] C1, edN; गुप्तसिश्नोदरो - B7; गुप्तशिष्णोदरो - C7
11. शमयति क्षणात्] emd; समयति क्षणात् - C1, B7; शमयतीक्षणात् - edN; समयती क्षणात् - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्यं शिवो धनुर्देही[1] मौर्वी[2] नादः शरो मनः।
बुद्ध्या निरूप्य[3] वेद्धव्यं[4] यथा नान्यत्र[5] गच्छति।। 16.6 ।।

यथैव हि धनुष्पाणिं[6] नित्याभ्यासाज्जितोऽपि[7] सन्।
इषुणैव[8] हनेल्लक्ष्यं[9] नाक्षिहस्तधनुर्गुणैः[10] ।। 16.7 ।।

तथैव त्यक्तसङ्गेन[11] चित्तेनैकेन[12] लभ्यते[13]।
फलं योगस्य तच्छेषो[14] यन्त्रोपकरणाः स्मृताः।। 16.8 ।।

आदौ पूरकहस्तेन[15] देहचापं प्रपूरयेत्।
बुद्धिदृष्ट्या[16] ततो योगी बिन्दुलक्ष्यं[17] निरीक्षयेत्।। 16.9 ।।

---

1. धनुर्देही] C1, edN,C7; धनुर्देहो - B7
2. मौर्वी] C1, edN; मोर्वी - B7; मौर्वी - C7
3. निरूप्य] B7, edN,C7; निरूप - C1
4. वेद्धव्यं] edN; वेधव्यं – C1, B7, C7
5. यथा नान्यत्र] C1, edN,C7; यथान्यत्र न – B7
6. धनुष्पार्णि] edN; धनुष्पाणि - C1, B7; धनुष्पार्नि - C7
7. नित्याभ्यासाज्जितोऽपि] B7; नित्याभ्यासजितोऽपि - C1; नित्याभ्यासोर्ज्जितोऽपि - edN; नित्याभ्यासार्जितोऽपिसन् - C7
8. इषुणैव] edN; इषुनैव - C1, B7, C7
9. हनेल्लक्ष्यं] C1(not readable), edN,C7; हते/ने?लक्ष्यं - B7
10. नाक्षिहस्तधनुर्गुणैः] edN,C7; नाक्षिहस्तधनुगुणैः - C1 (not readable), B7;
11. त्यक्तसङ्गेन] edN,C7; not readable - C1; त्यक्तसंज्ञेन - B7
12. चित्तेनैकेन] edN,C7; not readable - C1; चित्तेनैकेव - B7
13. लभ्यते] B7, edN,C7; लभ्य/भ?तेः - C1
14. तच्छेषो] B7, C1, edN; तच्छेषा - C7
15. पूरकहस्तेन] B7, edN,C7; पूरहस्तेन - C1
16. बुद्धिदृष्ट्या] B7, C1, edN; बुद्धिदृष्ट्या - C7
17. बिन्दुलक्षं] B7, C1, edN; बिन्दुलक्ष्यं - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

आपूर्णदेहचापस्थं[1] प्रेर्य नादगुणेन[2] तु।
प्राणयुक्तं मनोबाणं[3] लक्ष्यमध्ये प्रपातयेत्[4]।। 16.10।।

गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथवा यतिः।[5]
सङ्गत्यागी लभेन्मोक्षं स्वकर्मनिरतोऽपि सन्।। 16.11।।[6]

स्त्रीभिः शूद्रैर्गृहस्थैर्वा[7] म्लेच्छैर्वर्णाधमैरपि।
लभ्यन्ते कर्मयोगज्ञैर्न जातिस्तत्र कारणम्।। 16.12।।

तिष्ठन् गच्छन् स्वपन् भुञ्जन्[8] कर्मणा व्यावृतोऽपि[9] सन्।
चित्तेनैकेन[10] यो लक्ष्यं कर्मयोगी न मुञ्चति[11]।। 16.13।।

मनसा धारयेत् प्राणान्[12] प्राणायामैस्तथा मनः।
एवं ध्यायेत्परं ब्रह्म[13] नान्यत् किञ्चिद् विचिन्तयेत्[14]।। 16.14।।

दीर्घाण्यङ्गानि[15] विन्यासं ह्रस्वं[16] वक्त्रं तथैव[17] च।

---

1. आपूर्णदेहचापस्थं] C1, B7, C7; आपूर्य देहचापस्थं – edN
2. नादगुणेन] C1, edN; नदगुणेन - C7; नादं गुणेन B7
3. मनोबाणं] C1, edN,C7; मनोषाणं - B7
4. लक्ष्यमध्ये प्रपातयेत्] B7, edN,C7; not readable - C1
5. गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथवा यतिः] B7, edN,C7; not readable - C1
6. सङ्गत्यागी लभेन्मोक्षं स्वकर्मनिरतोऽपि सन्] B7, edN,C7;..... (not readable) स्वकर्मनिरतोऽपि सन् - C1
7. शूद्रैर्गृहस्थैर्वा] B7, edN,C7; शूद्रैर्गृहस्थैवा - C1
8. तिष्ठन् गच्छन् स्वपन् भुञ्जन्] edN,C7; तिष्ठन् स्वपन् भुञ्जन् - C1; तिष्ठंगच्छं स्वपं भुञ्जं – B7
9. व्यावृतोऽपि] C1, B7; व्यापृतोऽपि - edN; व्यापितोऽपि - C7
10. चित्तेनैकेन] C1, B7; चित्रेनैकेन - edN; चित्तेनेकेन - C7
11. न मुञ्चति] C1, edN,C7; निमुञ्चति - B7
12. प्राणान्] C1, edN,C7; प्राणा - B7
13. ध्यायेत्परं ब्रह्म] edN,C7; not readable - C1; व्यायेत्परं ब्रह्म - B7
14. विचिन्तयेत्] C1, B7; विवर्त्तयेत् - edN; विवत्तयेत् - C7
15. दीर्घाण्यङ्गानि] edN; दीर्घान्यङ्गानि - C1, B7, C7
16. ह्रस्वं] B7, edN,C7; ह्रस्वान् - C1
17. वक्त्रं तथैव] C1, edN,C7; वक्त्रस्तथैव - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

हंस हंसेति[1] यो वर्णं[2] वर्जयेत्[3] परमं पदम्।। 16.15।।
प्राणायामं प्रकुर्वीत परिश्रान्तो भवेद्यदा।
केवलं[4] मानसं[5] योगं[6] तदा योगी समारभेत्।। 16.16।।

तत्सम्बन्धां कथां[7] वापि कुर्याज्जापञ्च मानसम्।
न तु शून्येन[8] मनसा भवितव्यं तदा[9] बुधैः[10]।। 16.17।।

यदा शून्या भवेद्बुद्धिस्तन्मात्रेष्वनुरज्यते[11]।
ततो लब्ध्वावकाशैस्तैरिन्द्रियैर्ह्रियते[12] मनः।। 16.18।।

तस्मात्सर्वप्रयत्नेन चित्तमादौ[13] विशोधयेत्।
योगिनः शुद्धचित्तस्य सिद्धिर्हस्ततले स्थिता[14]।। 16.19।।

---

1. हंस हंसेति] B7, C1, edN; हंस हसेति - C7
2. वर्णं] B7, edN,C7; वर्णान् - C1
3. वर्जयेत्] C1, B7, C7; वर्ज(र्त्त)येत् – edN
4. केवलं] B7, edN,C7; केवल - C1
5. मानसं] B7, edN; मासनं - C1; मनसं - C7
6. योगं] C1, edN; योगी - B7; योग - C7
7. तत्सम्बन्धां कथां] C1, B7; तत्सम्बद्धं कथं - edN; यत्संबद्धां कथं - C7
8. शून्येन] B7, C1, edN; सून्येन - C7
9. तदा] B7, edN,C7; तथा - C1 (this line is not readable in C1)
10. बुधैः] C1, edN,C7; बुधै - B7 (this line is not readable in C1)
11. तन्मात्रेष्वनुरज्यते] C1, C7; तन्माते(post correction of त्रे)ष (post correction of ष्व)न्नरज्यते - B7; तस्मात्तेष्वनुरज्यते – edN
12. लब्ध्वावकाशैस्तैरिन्द्रियैर्ह्रियते] emd; लब्ध्वावकाशैस्तैरिन्द्रियैह्रियते - C1; लब्ध्वावकासैस्तैरिन्द्रियैह्रियते - B7; लब्ध्वावकाशन्तैरिन्द्रियैर्हियते - edN; लब्धावकासैस्तैरिन्द्रियैह्रियते - C7
13. चित्तमादौ] C1, edN,C7; चित्तिमादौ - B7
14. स्थिता] B7, edN,C7; स्थितः - C1

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

रूपादीन् प्राप्य[1] विकृतिं गच्छन्ति नयनादयः।
निर्विकारा भवन्त्येते[2] तन्मात्राणामसम्भवेत्[3]।। 16.20।।

तस्माद्रूपादयोऽनित्या[4] शून्या[5] इत्यपि भावयेत्।
तदभावादिन्द्रियाणां[6] शुद्धिः[7] समुपजायते।। 16.21।।

हेतोः सकाशाज्जायन्ते[8] सुखदुःखादिबुद्धयः।
निराश्रयस्य[9] चित्तस्य विकल्पो नैव विद्यते।। 16.23।।

तस्माद्धेतोरभावत्वं[10] शून्यत्वं वापि[11] भावयेत्।
निमित्ताभावयोगान्तु[12] न विकल्पमनो[13] भवेत्।। 16.24।।

इत्येते षोडश प्रोक्ता उपाया योगसाधनाः।
तान् सम्यग्योभिजानाति स योगीत्यभिधीयते।। 16.25।।[14]

---

1. रूपादीन् प्राप्य] edN,C7; रूपादीनप्राप्य - C1; रूपादीं प्राप्य - B7
2. भवन्त्येते] B7, C1, edN; भन्त्येते - C7
3. तन्मात्राणामसम्भवेत्] C1; तन्मात्रानामसम्भवै - B7; तन्मात्राणामसम्भवे - edN,C7
4. तस्माद्रूपादयोऽनित्या] B7; not readable - C1; तस्माद्रूपादयो मिथ्या (ऽनित्या) - edN; तन्मादूपादयोऽनित्या - C7
5. शून्या] edN,C7; not readable - C1; सून्या - B7
6. तदभावादिन्द्रियाणां] C1, edN,C7; तदाभावादिन्द्रियाणां - B7
7. शुद्धिः] C1, edN,C7; सुद्धिः - B7
8. हेतोः सकाशाज्जायन्ते] C1, edN; हेतोः सकाशाजायन्ते - B7; हेतो सकासाज्जायन्ते - C7
9. निराश्रयस्य] C1, edN,C7; न?राश्रयस्य – B7
10. तस्माद्धेतोo] B7, edN,C7; तस्माहेतोo - C1
11. शून्यत्वं वापि] edN,C7; शून्यत्वं ज्ञापि - C1; सून्यत्वं वापि - B7
12. oयोगान्तु] C1, B7; oयोगन्तु - edN,C7
13. न विकल्पमनो] C1, B7, C7; निर्विकल्पं मनो – edN
14. तान् सम्यग्योभिजानाति स योगीत्यभिधीयते] B7, edN; . . . . . (not readable) गीत्यभिधीयते - C1; तान् सम्यग्यो विजानाति स योगीत्यभिधीयते - C7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

आलोक्यात्यन्तगूढार्थं[1] शास्त्रं सनकनिर्मितम्।
वस्तुमात्रं समादाय धर्मशीलस्य सूनुना[2]।। 16.26।।

सुखावबोधा बालानां[3] ग्रन्थिता[4] संहिता मया।
निरूप्य दातुमर्हन्ति[5] दोषान्यक्त्वा[6] मनीषिणः[7]। 16.27।।

ये चित्तानि[8] सुतृष्णयैव सततं क्लिश्यन्ति[9] ये चापरे
स्वाम्याज्ञाश्रवणस्पृहाद्[10] अनुदिनं तिष्ठन्ति राजाङ्गन[11]।
ये चान्ये मदिरासवादिविविधास्वादेन[12] सम्मूर्च्छिता [13]–
स्तैर्योगस्य फलं सतां[14] बहुमतं नास्वाद्यते तत्सुखम्[15] ।। 16.28।।

इति धर्मपुत्रिकायां संहितायां[16] सिद्ध्युपायो[17] नाम षोडशः पटलः[18]।।

---

1. oगूढार्थं] C1, B7; oगुह्यर्थं - edN,oगुका/ह्य?र्थं - C7
2. सूनुना] B7, edN,C7; शूनुना - C1
3. सुखावबोधा बालानां] edN,C7; सुखावबोधबानां - C1; सुखावबोधा बलानां - B7
4. ग्रन्थिता] C1, B7, C7; प्रथिता – edN
5. दातुमर्हन्ति] B7, C1, edN; दातुमहन्ति - C7
6. दोषान्त्यक्त्वा] C1, B7, C7; दोषांस्त्यक्त्वा – edN
7. मनीषिणः] C1, edN,C7; मणीषिणः - B7
8. चित्तानि] C1, edN,C7; चिन्तानि - B7
9. क्लिश्यन्ति] C1, edN,C7; क्लिष्यन्ति - B7
10. स्वाम्याज्ञाश्रवणस्पृहाद्] B7; not readable - C1; स्वाम्याज्ञाश्रवणस्पृहा – edN; स्वाम्याज्ञश्रवणस्पृहा - C7
11. राजाङ्गने] edN,C7; not readable - C1; राजाङ्गण - B7
12. मदिरासवादिविविधास्वादेन] B7, edN,C7; मदिराशवादविविधास्वादेन - C1
13. सम्मूर्च्छिता] C1, edN; सम्मूच्छिता - B7; संमूर्च्छता - C7
14. सतां] edN,C7; शतां - C1; शता - B7
15. नास्वाद्यते तत्सुखम्] C1, edN; नास्वाद्य तत्सुखम् - B7; नास्वाद्यते तन्मुखं - C7
16. इति धर्मपुत्रिकायां संहितायां] B7, edN,C7; धर्मपुत्रिकायां - C1
17. सिद्ध्युपायो] C1, edN,C7; सिद्ध्युपायं - B7
18. षोडशः पटलः] edN; षोडशमः पटलः समाप्तः - C1, C7; षड्दशमः पटलः समाप्तः - B7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Bibliography

1. *A History of the ṣaḍaṅgayoga of the Kālacakratantra and Its Relation to Other Religious Traditions of India, www.scribd.com>Books-Non-fiction>Religion&Spirituality*
2. Gareth Sparham: *Indian Altruism: A Study of the Terms bodhicitta and bodhicittotpāda*, The Journal of the International Association of Bhuddhist Studies, Vol. 15, No. 2, pp. 224-242, 1992. *www.archiv.ub.uni-heidelberg.de/ojs/index.php/jiabs/article/.../2708*
3. Olivelle Patrick: *The Early Upanisads-Annotated Text and Translaton*, Oxford University Press, 1998.
4. Pansikar, Wasudev Laxman Shastri: *One Hundred & Eight Upanishads*, Nirnaya-Sagar Press, Bombay, 1925.
5. Petech, Luciano: *Mediaeval History of Nepal*, ROMA, Istituto Italiano per IL Medio Ed Estromo Orient, 1958.
6. Raghavan, V., Kunjunni Raja, K., Veezhinathan,N.: *New Catalogus Catalogorum*, Vol. IX, University of Madras, 1977.
7. Romberg, Margo von: *A History of Yoga from the Upanishads to the Hatha Yoga Pradipika, www.athayog.me.uk/history.pdf*
8. Sastri, Mahadeva. A., *The Yoga Upanishads: with the commentary of Sri Upanishad-Brahma-Yogin*, Adyar Library (Theosophical Society), 1920.
9. Sharma, Dillip Raj: *A Note on the Historical and Cultural Signicicance of Vajrayogini of Sakhu*, Contribution to Nepalese Studies, Vol. 23, No. 1, January 1996, pp. 271-283. *www.himalaya.socanth.cam.ac.uk/collections/.../pdf/CNAS_23_01_15.pdf*
10. Acharya, Anil Kumar: *Announcement of a Proposed Critical*

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Edition of Dharmaputrikā, Journal of Sanskrit Academy, ISSN-0976-089X, Vol. XXII, Hydrabad, 2012, pp.108-119.

11. Barois, Christele: *The Dharmaputrikā Saṃhita Preliminary notxe on an early text on Yoga*, Journal of Yoga Studies, Vol. 3, pp.5-76, 2020.

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Appendix



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



First folio MSC 1

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

The page of edN from which starts the text Dharmaputrika

अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया
संहितायां साधनप्रकरणं नाम
प्रथमः पटलः

ॐ नमः शिवाय

वन्दे देवं पुराणं शिवममरगुरुं भूतनस्थेन मूर्त्ता
नित्यं शान्तं सुसूक्ष्मं त्रिभुवननमितं सर्व्वलोकैकनाथम् ।
निस्सङ्गं निर्व्विकारं प्रजननमरणक्लेशलोकैर्व्विमुक्तं
योगाभ्यासैकवेद्यं त्रिगुणविरहितं नग्नसज्यस्वरूपं ॥१॥
शिवार्थं लोकानामगलशिवधर्म्मं शिवकृतं
महाशास्त्रं सारं पशुपतिमतं पारारहितं ॥
शिवं योगोद्योगं पशुपतिसमीपे निगदितो
विमुक्तयै सर्व्वेषामनुवदति योगी नरहरिः ॥
योऽसौ पशुपतिः सोऽयं गोरक्षो रक्षको गवाम् ।
शिवयोगिजनान्तिकं योगाभ्यासेषु रक्षतु ॥

तस्य बाधकः पुनर्भवः । भनिपेका ॐ कारका वाच्य ब्रह्मस्वरूप शिवलाइ नमस्कार । पशुपतिनामलाइ नमस्कार । शिवगोरक्षनामलाइ नमस्कार

ती श्रीभन्दा पुरानो देव शिवलाइ मैंला माथ राखेर श्रीसु, जो ३३ कोटि देवतामध्यका गुरु छन्, जो नित्य छन् सत्य छन् र शान्त छन्, जो पृथ्वी जस्तै तेज जस्तै वायु आकाश जस्तै चन्द्र सूर्य आत्मारूप अष्ट मूर्तिले प्रत्यक्ष भैकन पनि अन्तर्यामी रूपले अति सूक्ष्म छन्, तिनै लोकका अनेक प्राणीद्वारा पुजागर्न गरिपेका छन् र सबै लोक (अनन्त कोटि ब्रह्माण्ड) का नाथ छन् तर् मुक्षा तदेवानुप्राविशत् भनिए र ब्रह्मलोक सृष्टि गरेर जगत्को सन्त्रासन गरी रहे पनि पानीमा रहेर पानी देखि अलग रहेका कमल झैं जगत्सित असलग्न रहेका, आफ्ने अस्ति नास्ति विनिर्मुक्त अपक्षीयते विनश्यति' भनियेका पद्धतिका विकारहरूदेखि निस्तेर बसेका, जन्म र मृत्युका दोषदेखि विमुक्त रहेका अविद्या अस्मिता, राग, द्वेष, अभिनिवेशका कष्ट क्लेशहरूका खेदबाट पनि मुक्त रहेका, सत्त्वगुण, रजोगुण, तमोगुणमय त्रिगुणात्मिका प्रकृतिदेखि विरहित रहेर पनि स्वस्वरूपा शक्तिले युक्त भएका शिवस्वरूपान्तरे शक्तिः शक्तेरभेदनारे शिवः । अन्तर शिव जानीयाच्चन्द्रचन्द्रिकयो रिव' । भनिपेका, नमस्कार ब्रह्मरूप ॐ प्रकारको जप्नो न भयेका छन् र जो एक मात्र योगाभ्यासद्वारा ज्ञान भक्तिछन्, ती पशु (ज्ञान) का पति (नाथ) लाई बारं बार वन्दना गर्छु ।

नित्यं शान्तं सुसूक्ष्मं क्षितिजलदहनाकाशवातैर्विमुक्तं
प्रत्यक्षादिप्रमाणैः कृतिभिरविदितं हेतुदृष्टान्तशून्यं ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

First folio MSB 7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



First folio MSC 7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Dr. Anil Kumar Acharya (1978), M.A., M.Phil., Ph.D., *Shiksha Shastri* (B.Ed.), is an Assistant Professor (Selection Grade) working in the Department of Sanskrit, Ambedkar College (A Govt. Degree College), of Tripura, since 2011. Before, he also worked as a Research Assistant in the Department of Indology of the French Institute of Pondicherry (IFP), a research institute of the French Ministry of Foreign Affairs situated in the Union Territory of Puducherry. His areas of research are Sanskrit Literature, Manuscriptology, and the History of Śaivism (Śivadharma Corpus and Odisha). He has attended a number of National and International Conferences/workshops, viz. international workshop on "Early Tantra" at Kathmandu, the 15th World Sanskrit Conference at New Delhi, etc. He is crowned with the 'Pandit Ganeshwar Dash Prize' for the best performance in the 'Epic & Puranas' section of the 45th session of the All-India Oriental Conference held at Tirupati. He has published several research papers in various national and international journals and books pertaining to his area of study. He is associated with different research organizations and academic bodies in various capacities. Website:

https://sites.google.com/view/dranilkumaracharya

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Pratibha Prakashan
(Oriental Publishers & Book Sellers)
7259/23, Ajendra Market, Prem Nagar,
Shakti Nagar, Delhi-110007
Ph. : (0) 011-47084852, 09350884227
e-mail : pratibhabooks@ymail.com
Visit us : www.pratibhabooks.com

ISBN 81-7702-514-7

Center for Shaiva Studies, Pondicherry Collection